863

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Other Works by Dr. Jatindra Bimal Chaudhuri

DRAMAS

1. BHAKTI-VISNUPRIYAM, on the life of Sri Visnupriya, Holy Consort of Lord Gauranga Rs. 2.

2-3. MAHAPRABHU-HARIDASAM, on the life of Haridasa, foremost Disciple of Mahaprabhu Rs 4. In Bengali and Devnagar Scripts (Two separate volumes).

4. NISKINCANA-YASODHARAM, on Yasodhara, Holy Consort of Lord Buddha. Rs 5. 50 np.

5. MAHIMAMAYA-BHARATAM, a new Sanskrit Drama on the Irrigation Policy of India throghout the Ages. Rs. 2.

6. BHARATA-BHASKARAM, a new Sanskrit Drama based upon the early life of Ravindranath. Rs. 4.

Dramas ready for the Press

7. BHUVANA-BHASKARAM, based upon the later part of Ravindranath's life.

8. BIMBASUNDARI PATIVIMBANAM, the First Pali Drama ever written. On Yasodhara-Gopa, Holy Consort of Lord Buddha.
   (a) In Devnagar Script.
   (b) In Roman Script.

9. DINA-DASA-RAGHUNATHAM, on Raghunath Dasa Gosvamin, one of the six Vrndavan Gosvamins. A new Sanskrit Drama.

10. PRITI-VISNUPRIYAM, based upon the early part of the life of Sri Visnupriya, Holy Consort of Lord Srikrishnacaitanya Mahaprabhu. A new Sanskrit Drama by Dr. Jatindra Bimal Chaudhuri.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

PRACYA VANI SANSKRIT SERIES
Vol. XXXII



भारत-हृदयारविन्दम्

पश्चिमवङ्ग-सर्वकारीय-संस्कृत-शिक्षापरिषदध्यक्षेण

डक्टर-श्रीयतीन्द्रविमलचतुर्धुरीणेन विरचितम्

Bharata-Hridaya-Aravindam

(A New Sanskrit Drama)

by

Dr. Jatindra Bimal Chaudhuri Ph. D.

(Staged for the first time at
Sri Aurobindo Ashram,
Pondicherry)

Foreword by

DR. SATKARI MOOKHERJI

Calcutta, 1960

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Published By—Dr. J. B. Chaudhuri
For
Pracyavani (Institute of Oriental Learning)
3, Federation Street, Calcutta—9

Available from the
PRACYA VANI
Address as above

Sanskrit Pustak Bhandar
38, Cornwallis Street, Calcutta.

DAS GUPTA & CO.
54/3, College Street, Calcutta.

Chowkhamba Sanskrit Series Office
BANARAS CITY

Motilal Banarasi Das
P. B. 75, Chowk, Banaras City
Or,
Jawaharnagar, New Delli

MUNSHIRAM MANOHARLAL
PB. 1165, Nai Sarak, Delhi-6

Printed by—Sri Ajit Kumar Banerji
BANI LEKHA PRESS
7B, Ram Mohan Saha Lane, Calcutta-7

Rexin : Rs. five only

Price Rs. 3.50 n.P.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Introduction

The Bharata-Hridaya-Aravindam was composed in 1959 and staged for the first time at Sri Aurobindo Ashram, Pondicherry, with the blessings of the Mother. In this connection, we acknowledge our grateful thanks to Sj. Nalini Kanta Gupta, Secretary to the Ashram, Sj. Jatindra Das, Sj. Mrityunjay Mukheji, and many others of the Ashram who helped us on this occasion in various ways.

We are particularly beholden to Sm. Vratati Di who was responsible for the stage management, etc.

Our stay at Sri Aurobinda Ashram, though only for four days, has been and will ever be a cherished memory to us all who visited the Ashram. We staged three Sanskrit Dramas on three successive nights from the 15th to 17th October, 1959, viz. the Sakti-Saradam, the Bharata-Hridayaravindam, and the Mahaprabhu-Haridasam, based on the holy lives of Sri Sāradāmani Devi, Sri Aurobindo, and Bhakta Haridāsa respectively and composed by my humble self. Incidentally, these were the first Sanskrit plays staged at the Aurobindo Ashram, Pondicherry and it is a matter of very great gratification and thankfulness to us all that each and every performance was attended by more than two thousands of Ashram inmates and other devotees. The Mother very graciously sent us her blessings and flowers every night and on the concluding day, our revered and beloved Nalini Da publicly presented the Prachya Vani Troupe with clothes and other things made in the Ashram, with the blessings of the Mother. An address of welcome was very kindly presented to the Prachya Vani by the Sanskrit Department of the Ashram. On the 18th October,

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

1959, a Recital of Sanskrit songs composed by my humble self by Sri Bimal Bhushan, Sri Bejoy Bhushan, Sri Prabhat Bhusan, and Sri Sudhir Chatterji was arranged and fortunately, much appreciated by the Ashramites.

We also beg to record here that, through the affectionate grace of the Mother, the whole Prachya Vani Sanskrit-Pali players' troupe including Sm. Chabi Banerji, the celebrated singer, and the young Artist Sri Purnendu Roy paid a second visit to the Ashram on the 29th December, 1959, i.e. within a couple of months of the first time. This night a Song Recital of the Sanskrit songs composed by myself was arranged and on the 30th December, we staged the Sankrit Drama Bhakti—Visnupriyam based on the later life of Sri Viṣṇupriyā, Holy Consort of Lord Kriṣṇa Caitanya Mahāprabhu Gaurāṅga. The Songs were very kindly tape-recorded by the Ashram.

We are recording all these here in a spirit of gratefulness and humbleness. May the infinite blessings of the Mother be showered on us !

The facts mentioned in this drama are based on authoritative sources, particularly, the writings of Sri Aurobindo himself

We pray to the Mother for her infinite and constant blessings !

PRACYA VANI
3, Federation Street,
Calcutta—9

J. B. Chaudhuri
20. 12. 60.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Blessings

It is customary to have a book published with an "Introduction" from some one else. But Dr. Jatindra Bimal Chaudhuri does not need an 'Introduction' from my humble self or from any one else. For he is now, and for long, shining in his own light, as one of the brightest intellectual luminaries of Modern India. His invaluable contributions to Sanskrit Literature, both as a Research Scholar, Poet and Dramatist, will, surely, remain recorded in letters of gold in the History of Modern India.

But though Jatindra Bimal spent nearly ten years of his early life in Europe, he is an Indian through and through. So, he will not begin anything without bowing down at the feet of his elders and teachers, without their blessings. I happen to be both and at his earnest request, I gladly record here a few words as my heart's blessings for him and his talented wife of equal fame, Brahmavadinī Dr. Roma Chaudhuri.

The holy life of Sri Aurobindo is indeed a unique one, from many stand-points. But unfortunately as yet, no complete account of the same is available in any language. So, the present work, based on historical materials, is indeed a great one both from the Research and Dramatic points of view. It is the first ever Drama on the Divine Life of Sri Aurobindo in any language, and we are very glad to note that, it is a pioneer not only in respect of time, but also, and more so, in that of worth. I need not here waste paper and ink in elucidating this point.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

For, any reader who will go even through a few pages of the present work, will at once be charmed by the simplicity and sweetness of language, depth of thought, excellence of the plot — and above all, the spirit of intense devotion, permeating the whole work, raising it to the level of an "Arghya" or an Offering from a "Bhakta" or a Devotee.

I have no doubt that this "Heart-Lotus of India", staged for the first time at Sri Aurobindo Ashram, Pondicherry, with the blessings of the Mother, will capture the hearts of all and earn their blessings for ever. Aud I know very well that my beloved pupil Jatindra Bimal does not wish for any thing else.

Satkari Mookherji
Director, Nalanda Research
Institute, Bihar.
25. 12. 60

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

CONTENTS

Subject			Page
Introduction	....	....	.... 3—4
Blessings	....	...	.... 5—6
Contents	...	...	... 7—8
Synopsis of the Drama		....	.... 9—16

Text

			PAGES
FIRST ACT	....	....	.... 1—9
Prastāvanā	....	....	1—4
"Lotus-Dagger" Society in Cambridge			5—9
SECOND ACT	....	....	.... 10—19
Sri Aurobindo in Baroda			
1. A Family Scene	....	....	10—15
2. Vārīndra's Initiation to Patriotism	....	....	16—19
THIRD ACT	....	....	.... 20—24
Sri Aurobinda and Surat Congress			
FOURTH ACT	....	....	... 25—41
Sri Aurobindo in Calcutta			
1. Sri Aurobinda's arrest from Navaśakti Karyalaya at Grey Street, Calcutta	....	...	25—29
2. Alipore Bomb Case and Sri Aurobinda	....	....	30—35
3. Sri Aurobindo, Sister Nivedita and Saralā Ghosh		....	36—41

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

FIFTH ACT .... 42—54

SRI AUROBINDO IN PANDICHERRY

1. The Mother and Sri Aurobindo 42—47

2. Sri Aurobindo and Deshabandhu Chittaranjan Das .... 48—50

3. (a) Sri Aurobindo and Independence of India .... 51—53

(b) The Mother hoists the Banner of Religion on top of Sri Aurobindo's House .... 53—54

Appendices

Index of Metres .... 55—56

Verse—Index .... 57—61

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

SANSKRIT

DRAMA BHARAT-HRIDAYARAVINDAM

SYNOPSIS OF THE WORK

Nandī

Obeisance to Sri Aravinda, the Heart-Lotus of India, the best of all Indian Sages, who found the bliss of Vrindavana even in a prison, and the eternal joy of whose life was to liberate his mother-country from foreign bondage.

FIRST ACT, SCENE I : PRASTĀVANA

The Sutradhāra or the Stage-Manager and Naṭī or the Chief Actress.

The Sutradhāra tells the Natī that there has always been a bond of love and friendship between Bengal and the South, and that love of Country and love of God are but two sides of the same thing.

FIRST ACT : SCENE II

Time—Afternoon.

Place—"The Lotus and Dagger" Secret Society at Cambridge, 1872.

Sri Aravinda, his brothers Manomohan and Vinaya Bhusan, and friend Moropant Joshi.

Sri Aravinda, sent to England for education at the tender age of seven, is now 21 years old. But this long foreign education makes him hanker all the more for the independence of his own mother-country. So, he associates himself with a Secret Society, named "The Lotus and Dagger Society" at Cambridge and devises means and ways for Indian Independence. Sri Aravinda, his brothers and friends assemble there and take a solemn vow to dedicate themselves to the cause of Indian Independence. But Aravinda advises all to eschew violence and work not only for the good of Indians, but of all. He also points out

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

that in India, three Mothers are always worshipped together—One's own Mother, Mother-Country and Mother of the Universe.

SECOND ACT : SCENE I

Time—Morning.

Place—Sri Aravinda's residence at Baroda.

Sri Aravinda, his wife Mrinalini, his sister Sarojini and brother Varindra.

A sweet family scene. Sri Aravinda, aged about 30, is now working as a Professor in Baroda Raj College. True to his philosophy of life, he sees the hands of God in all the happenings of his life, such as the sudden death of his father, his marriage with Mrinalini, the daughter of a rich man and so on. He inspires his wife also to a life dedicated to God completely. His younger sister Sarojini jokingly asks him not to preach to and teach his wife Mrinalini like a school-master always. Sri Aravinda replies that he preaches and teaches only love of Country, and asks Sarojini as to what part they, as women, will take in this great struggle for Indian Independence. Sarojini promptly replies that they, like lotuses. will specially pour the honey of love and spread the fragrance of unselfish service, all round. Then Sarojini sings a patriotic song.

SECOND ACT : SCENE II

Place—Sri Aravinda's residence at Baroda. Midnight.

Sri Aravinda and his brother Varindra.

Aravinda initiates his dear brother Varindra to the Fiery Vow of Liberation of Mother-Country. This is taken to be a religious ceremony, and all the rites, attached to the performance of a Yajna or holy sacrifice, are performed here, such as, kindling fires, burning incenses, uttering Mantras etc. As symbols of this noble

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

vow, Sri Aravinda puts a Gītā on Varindra's right hand, and sword on his left. The former stands for Niṣkāma-Karmas or the supreme ideal of unselfish service, the latter for Śakti, or Soul-force.

THIRD ACT : SCENE I

place—Surat, Congress Session, 1907. Time—Morning

Sri Aravinda, Sri Tilak and other leaders, Moderate and Extremist, Right and Left Wing snpporters.

The historical Surat Congress Session in 1907 was marred by internal dissensions between two rival groups, Right and Left, Moderates and Extremists.

Sri Aravinda and Sri Tilak, representing the latter group and standing for the ideal of "Purna Svaraja" or Full Independance of India desire to have Lala Lajpat Rai as President, while, Sir Surendranath Banerji and other Moderate leaders fix on Sir Rashbehari Ghose. Consequently, Moderates and Extremists come to blows, and a great pandemonium follows. But in the midst of all these confusion and disorder, Sri Aravinda remains absolutely calm, and advises others to refrain from violence.

FOURTH ACT : SCENE I

Place—The Office of Sri Aravinda's paper 'Navaśakti" at Grey Street, Calcutta. Time—Morning.

An explosive time for Bengal during the years 1905-09, when terrorism by the ruler and its inevitable consequence political oppression by the rulers, have upset the normal life of Bengal. Some serious incidents, like murder of two European ladies at Muzffapur and Maniktolla Bomb Conspiracy, are agitating the minds of all. At this juncture, Sri Aravinda is arrested for his alleged part in Manicktolla Bomb Conspiracy. The Police Superintendent Kregan, accompanied by Vinode Babu, belonging to C. I. D., enters the Navaśakti-Office to arrest Sri Aravinda. He at first takes Sri Aravinda to be a servant,

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

dressed as he is in a very simple and poorly manner. He, then accuses Sri Aravinda of ingratitude, as although educated in England, he is in this way plotting to drive away Englishmen from India Suspicious and coward by nature, he even goes to the length of taking the dust, collected by Sri Aravinda's wife from the Bhavatarini Temple at Dakshinewar, to be a kind of explosive gunpowder. A bully by nature, he orders his officer to tie Sri Aravinda with rope, and drag him through the streets like an ordinary criminal. Coming to know of this, Sri Bhupendra Bose, though a Moderate and politically opposed to Sri Aravinda, remonstrates vehemently and makes the Police Superintendent untie Sri Aravinda.

FOURTH ACT : SCENE II

Place—Alipore Law-Court. 1908—9. Time—Morning.

Judge Beachcroft, Public Prosecutor Norton, Sri Chittarajan Das on behalf of Sri Aravinda, Sri Aravinda, Jury and others.

Judge Beachcroft reflects over the irony of fate which has made him a Judge to try the case of Sri Aravinda, one of his friends at Cambridge, on a charge of sedition and participation in the Manicktolla Bomb Conspiracy.

Given a chance by the Judge to defend himself, Sri Aravinda simply asserts that to his mind, the whole trial is really a farcical one ; for, if love of country and striving for its liberation from a foreign rule be criminal offences, he frankly admits his guilt and is willing to be given any punishment according to Law.

The Public Prosecutor Mr. Norton produces a Post-Card, purporting to be sent by Sri Aravinda's brother Varindra, asking him to send "sweets". meaning "bombs". Sri Chittaranjan Das jokingly asks Mr. Norton to learn Bengali as a student of Srirampur College, so that he may not again make such a foolish mistake as to take "sweets" to mean "bombs". Then he proves the whole post-card to

CC-0. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

be a fake, as it contains no post-mark or date. Then, in his famous speeches, he asserts with firm faith, that Sri Aravinda will always be "looked upon as the poet of patriotism, as the prophet of nationalism and lover of humanity".

FOURTH ACT : SCENE III

Place—Sister Nivedita's House at Bagbazar, Calcutta. Year 1910 Time—Morning.

Two police spies, Wandering Singer, Sri Aravinda, Sister Nivedita, Sm. Sarala Ghosal.

The Police Spies, deputed to keep a watch on Sri Aravinda's movements, lament their fates which have forced them to spy against such a Holy Saint as Sri Aravinda. Tired of their vigilance, they ask a wandering singer to sing for them.

Sri Aravinda meets Sister Nivedita at her residence and she fervently pleads with him to guard against his imminent arrest, as that would be immensely harmful for the country. She even advises him to leave British territory and seek refuge in a French settlement, to escape arrest. Sri Aravinda agrees to write an article in the "Vande-Mataram" paper to make his views clear. Sm. Saralā Ghosāl, a famous Social Worker, also joins Sister Nivedita and pleads with Sri Aravinda to avoid arrest for the sake of his countrymen.

FIFTH ACT : SCENE I

Place—Sri Aravinda's Residence at Pondicherry. Year 1914

Time—Afternoon.

Sri Aravinda, and The Mother

The historic meeting between Śri Aravinda and Mother Mira on the 29th March, 1914.

Roaming in search for the Great Yogin she has seen in her dreams, Mother Mira, āt last arrives at Pondicherry

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

and finds there what she has been seeking all throughout her life. This marks the beginning of a new chapter in the history of Indian Spiritualism.

FIFTH ACT : SCENE II

Place—Sri Aravinda Ashram at Pondicherry, 1923
Time—Morning.
Sri Aravinda, Śri Chittaranjan Das.

Sri Chittaranjan fervently pleads with Sri Aravinda to return to political life and assume the leadership of the "Swaraj Party". But Sri Aravinda firmly refuses to do so and says that in his opinion, the Independence of India will come in its own course and his contributions to its cause will always be there ; but the special task for him is the spiritual uplift of the whole world.

FIFTH ACT : SCENE III

Independence Day, 15th August, 1947. Sri Aravinda Ashram, Pondichirry.

Sri Aravinda and the Mother.

In his famous Independence Day Message, Sri Aravinda declares that the attainment of Indian Independence on his birthday, the 15th August, is not a mere coincidence, but has a profound meaning, viz, the Indepence can be attained, mainly through spiritual means—not through political devices only.

Joyfully, the Mother hoists the Banner of Religion on the top of Sri Aravinda's House.

The Bhaktas sing in praise of Mother India

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Dramatis Personae

(18th. October, 1959)

Males

Nandi Singer—Sri Bimal Bhushan
Sri Aurobindo—Prof. Ashok Chatterji, Shastri, Panchatirtha
Benoy Bhushan (Sri Aurobinda's brother)—Sri Dipak Chatterji, B. A.
Manomohan (Sri Aurobinda's brother)—Sri Prabhat Bhushan
Moropanta Joshi—Sri Dipak Ghosh, B. A.
Sri Tilak—Prof. Ravindra Nath Bhattacharya, M, A. Vedantatirtha
Sri Surendra Nath Banerji—Sri Dipak Chatterji, B.A.
Police Superintendent Mr. Kregan—Prof. Gopikamohan Bhattacharya M.A., Nyaya-Kavyatirtha
Judge Beachcroft - Prof. Siddheswar Chatterji, M.A.
Public Prosecutor Mr. Norton—Sri Shaktiprasad Mookherji, B.A.
Sri Chittaranjan Das—Prof. Ravindra Nath Bhattacharya
Sri Bhupendra Bose— and Shyam Saubag (Spies :—imaginary characters) } Sri Dipak Ghosh, B.A, Prof. Gopikamohan Bhattacharya, M.A,
Moderate Volunteer—Sri Dipak Ghosh
Extremist Volunteer—Sri Shaktiprasad Mookherji
Bhakta Gayak—Sri Bimal Bhushan

Females

Sister Nivedita—Prof. Svapna Das, M.A.
Sarojini— " "
(Sri Aurobindo's Sister)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Mrinalini (Sri Aurobindo's wife) and Nati
—Sm. Sunanda Mitra, B A.
Sri Sarala Ghoshal—(a social worker)
—Sm. Uma Guha, M. Sc,

Music and musical accompaniments

Sri Bimal Bhusan, Sri Bejoy Bhusan, Sri Prabhat Bhushan, etc.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भारत-हृदयारविन्दम्

(नाटकम्)

डक्टर—श्रीयतीन्द्रविमलचतुर्धुरीणविरचितम्

नान्दी

नमामि भारतहृदयारविन्दं
भारतयोगिश्रेष्ठं श्रीलारविन्दम् ।
कारागारलब्धवृन्दावनानन्दं
जन्मभूमि-समुद्धार-नित्यानन्दम् ॥१॥

———

प्रथमः अङ्कः

प्रस्तावना-दृश्यम्

सूत्रधारः। अहो आनन्दो महानन्दः !

पन्दिचेरी-धामस्थ-श्रीमदरविन्दाश्रम-महामातुः श्रीश्रीमीरादेव्या अनुमतिक्रमेण आश्रमपरिचालकवर्गैरादिष्टोऽस्मि, पवित्रेऽस्मिन् आश्रमपदे दिव्यजीवनवादप्रवर्तकस्य श्रीलश्रीमदरविन्दस्य दिव्यजीवन-मधिकृत्य किञ्चन नाटकं नाट्ये प्रयोजयितव्यम् इति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अहो ! अपूर्वा युक्तियुक्ता चेयम् आश्रमपरिचालकानां दृष्टपूर्वपात्रस्य नाटकस्याभिनयदिदृक्षा। तथाहि—

चिरातीतैः पात्रैर्घटितमनवं रूपकचयं
सदा दर्शं दर्शं यदजनि जनानां विरसता।
गुणज्ञास्ते तस्मान्नव-कवयितुर्नाटकमिदं
स्वयं दृष्टैः पात्रै रचितमधिकुर्वन्त्यभिनये ॥२

तदधुना वयं पश्चिमवङ्गसर्वकारीय-संस्कृतशिक्षापरिषदध्यक्षेण डक्टर-श्रीयतीन्द्रविमलचतुर्धुरीणेन विरचितम् अभिनवं संस्कृतनाटकं "भारतहृदयारविन्दम्" नाट्ये प्रयोक्ष्यामहे।

[नटीमुद्दिश्य] देवि ! यदि तव कार्यमवसितं, तदत्रागम्यताम्।

नटी। [त्वरितं प्रविश्य] देव इयमहमागतास्मि। नियोगादेशं प्रार्थये।

सूत्रधारः। देवि! परमपवित्रमिदमाश्रमस्थानं यत्र स्वयं श्रीमदरविन्दो न्यवात्सीत्; तथा निवसत्यद्यापि श्रीश्रीजननी। तपोवेद-ध्वनिरतोऽदूरस्थः समुद्र आश्रमवासिनां सर्वं क्लेशं विदूरीकृत्य नित्य-कृत्यप्रोत्साहनरतो नृत्यताल परायणः सततं लसति।

कल्लोलैस्ताललीलामुरसि कलयतो नृत्यतश्चारुरूपं
पारावारादुदेति ध्वनिरतिमधुरः सामसाम्यं दधानः।
वर्षन्नानन्दधारां श्रुतिकुहरमनु प्राणिनामाश्रमेऽस्मि-
न्नुत्थायोत्थाय लीनो भवति मुहुरसौ दूरदिक्चक्रबाले ॥३

इतश्च दृष्टिं पातयतु देवी। अस्यां शारदपौर्णमासी-रजन्यां निर्मले आकाशतले परिपूर्णकलः कलानिधिरपि कीदृशीमपूर्वां कान्तिच्छटां प्रकटीकरोतीति। अहो महत्त्वं सिन्धु-नभसोः ! दृष्टिहारी चानयो-र्दिक्प्रान्ते परस्परसंस्पर्शः।

द्वावेव नीलवपुषौ सुतरामसीमा-
वित्यन्तयोर्न मिलतः सखितां विधातुम्।
स्थाने ततः समनुभूय जनिं समुद्राच्
चन्द्रोप्ययं वसति विष्णुपदे चिराय ॥४

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तत् समयं एवायं दिव्यजीवन-पर्यालोचनायाः। सामाजिकाश्च न केवलं भारतस्य, परं जगतो विभिन्न-प्रान्तेभ्योऽपि समागताः श्रीमदरविन्दजीवनसुषमामोदिनो भक्ताः। सर्वेषां हिताय प्रार्थये श्रीमदरविन्दस्य महामातुश्चाशीर्वादान्।

नटी। भगवन्तं श्रीमदरविन्दं वन्दे। देव! दिव्य-देहधारिणो महापुरुषस्य श्रीमदरविन्दस्य दाक्षिणात्य-निवासो मह्यं भृशं रोचते।

सूत्रधारः। कथं देवि तत्?

नटी। देव! पश्य दाक्षिणात्यमेव निवासस्थानं महादार्शनिकानां शङ्कराचार्यरामानुजप्रमुखाणाम्। अतो जन्मना गौड़ीयस्यापि वर्तमानयुगीय-सर्वश्रेष्ठ-दार्शनिकस्य दाक्षिणात्ये वासः सर्वथास्माकमानन्दकर एव।

सूत्रधारः। सुष्ठु लक्षितं श्रीमत्या। पश्य देवि! वङ्गदेश-हृदयानन्दो महाप्रभुः श्रीकृष्णचैतन्योऽपि स्वधर्म-संप्रचारण-संप्रसारणार्थं प्राथम्येन दाक्षिणात्यमगच्छत्। श्रीविवेकानन्दमाध्यमेन श्रीरामकृष्ण-धर्ममत-संप्रचारणमपि जगति दाक्षिणात्यात् एवाघटत। एवं दाक्षिणात्येन सह वङ्गदेशस्यास्ते निविड़ो नाड़ी-संयोगः। पुनश्च, जन्मना मद्रवासिनोऽपि अमर-सन्तोष-वल्लभादयो वङ्गवासिन इति कथ्यन्ते। अतस्त्वं यथा कथयसि, तत् सत्यमेव रुचिकरम्। यथा तव, तथा ममापि भृशम्।

नटी। देव! अस्ति पुनरपि मे प्रश्नविशेषः।

सूत्रधारः। निःसङ्कोचं ब्रूहि।

नटी। देव! देशप्रीति-भगवत्प्रीत्योः को विशेषः?

सूत्रधारः। एष एव प्रश्नः प्रस्तुत-नाटकस्यापि विषयः। प्रथमा द्वितीयायां परिणमति, द्वितीया च प्रथमया प्रकाशतेतराम्—यथा तथा वा भवतु, एकाऽन्यस्यां वरीवर्तते स्थिरा भवति च। अथवा मुद्रायाः पृष्ठद्वयवत् अनयोरवस्थितिः—अभिन्नापि व्यवस्थाविशेषेण भिन्नरूपतया दृश्यते।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किञ्च—

प्रीतिः स्वदेशविषया बहुशीलिता चेत्
प्रीत्यै परं भगवतो ननु कल्पते सा।
एकाग्रतां विदधता भजनस्य मूलं
ध्यानं यथाभिमतवस्तुनि संविधेयम् ॥ ५

नटी। एष उपदेशः सारगर्भ एव।

सूत्रधारः। देवि! पश्यास्य तत्त्वस्य प्रत्यक्षं प्रमाणमदूरतः—

स्वदेशसेवाहितजीवनः शुभः
स कृष्णघोषस्य सुतो बृहद्यशाः।
सन्धुक्षयन् विप्लवमाशु केम्ब्रिजे
स्वाराज्यनेतृत्वमुपैति साम्प्रतम् ॥ ६

मदुक्ततत्त्वस्य देवि दृष्टान्तस्ते विराजति सम्मुखे।
वृन्दावन इव कृष्णो वसुदेवदयाधन्योऽयम् ॥ ७

॥ इति प्रस्तावना ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

प्रथमः अङ्कः

द्वितीयदृश्यम्

[स्थानं—लोटास-डेगार-नामक-केम्ब्रिजस्थ-गुप्त-समितिगृहम्]

काल:—अपराह्न:

प्रविशति श्रीअरविन्दः

(सङ्गीतम्)

श्रीअरविन्दः—

वन्दे धृतिधरां नो भारतमातरम् ।
मातामह-चिरस्तुतां वङ्किमार्प-दृष्टिधृतां
विश्वक्षेमैकजीवितां ब्रह्मपराम् ॥८॥
ग्ल्याड्ष्टोनप्रजाप्रीति-कालमार्क्स्-साम्यनीति-
पाश्चात्त्य-चिन्तनातति-नित्यगोचराम् ।
उपनिषद्योगजुष्टां क्षितितलदीक्षापुष्टां
स्वाधीनां कदा द्रक्ष्यामि वीतभराम् ॥९॥

जननि जन्मभूमे ! तुभ्यं भूयो भूयो नमः ।

अहो सप्तवर्षवयस्कोऽहं पितृभ्यां सहागच्छं ब्रिटानियायाम् । अष्टादशवर्षवयःक्रमकाले आइ-सि-एस् पदवीधारणगौरवान् मां त्रातवान् भगवान् विश्वनियन्ता ।

पिता मे आशास्ते अहं परिचालनावीरो भविष्यामीति ; किन्तु नाहं कदापि भवेयं भारते बृटिश-शासन-परिचालनतत्परः । तथाहि—

लब्ध्वाहमाङ्गलनृपस्य नियोज्यभावं
शिष्यां निरायति चिरं मम जन्मभूमिम् ।
आशा चिरात् पितुरियं मनसि प्ररूढा
शक्या मया कथमहो सफला विधातुम् ॥१०॥

आं दृष्टम्—

न्याय्ये वर्त्मन्यथ च पुनरुज्जीवने धर्ममार्गे
संस्थाप्यैनां मम जनिभुवं कुर्वता च स्वतन्त्राम् ।
निर्वास्यास्याः प्रबलविहितं पीडनं दुर्बलानां
पूर्तिं नेया पितुरपि मया वासनेयं सुतीव्रा ॥११॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तदनु द्वाविंशतिवर्षपर्यन्तं कति कति न दृष्टाः पाश्चात्त्यमनीषिणः। देवतापर्यायभूताः खलु ज्ञानवृद्धास्तपस्विनः सर्वेष्वेव देशेषु। स्मर्यते रवार्टब्राउनिं पुत्रवर्यस्य केम्ब्रिजविश्वविद्यालयसर्वश्रेष्ठालङ्कारस्य ओस्कार-ब्राउनिं महोदयस्य मां प्रति प्रभूतः स्नेहः। एतेषाम् आंग्लद्वीपवासिनां तथा फरासी-जार्माणादि-देशवासिनां च साहित्यादिकम् आनीतं मया। किन्तु सर्वथा गरिष्ठा मन्यते मया भारतीया कृष्टिः सभ्यता वा।

भगवन्! पितुरुद्दिष्टं मत्कृतं परिचालनं यथार्थं सार्थक्यं प्रापयितुम् अवलम्बितमुद्यमं मे सफलीकुरु।

[ततः प्रविशतो मनोमोहनः मोरोपन्थयोशी च]

मनोमोहनः। [स्वगतम्] न जाने किमुद्दिश्य श्रीमतारविन्देनेयं क्षुद्रा "लोटास-डेगार" समाख्या समितिरस्यां केम्ब्रिज-नगर्यां परिचाल्यते? परिणामोऽस्या भवतु सुखावहः।

[अरविन्दमुद्दिश्य]—

अरविन्द स्वयंभूस्त्वं श्रीवत्सलाञ्छनोऽस्म्यहम्।
मोरोपन्थश्च भूतेशो जातं ब्रह्म त्रिखण्डितम्॥

मोरोपन्थः। अपि अन्ये न समागमिष्यन्ति?

श्रीअरविन्दः। संख्या-न्यूनतायामेव गुप्तसंस्थाया गौरवम्। तथापि अन्येऽपि केचन समागमिष्यन्तीति मन्ये।

अये! इतो ममाग्रजो विनयभूषण आगच्छति।

[ततः प्रविशति विनयभूषणः]

श्रीअरविन्दः। आगच्छाग्रज! आगच्छ। अस्माकं समयः स्वल्प इति हेतोः समाकार्यं प्रारभताम्।

मोरोपन्थयोशी। सर्वकार्यविभावनाध्यक्षोऽरविन्दः सभापतिपदमल-करोतु॥

श्रीअरविन्दः। नहि नहि।

विनयो भूषणं यस्य नेताऽस्माकं भवेद्धि सः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

विनयः। अग्रजातो महाराजो युधिष्ठिरो बभूव ह।
अग्रयायी सदा वीरः संग्रामे तु धनञ्जयः॥

श्रीअरविन्दः। प्राथम्येनास्माभिः सङ्कल्पो ग्रहणीयः।

मोरोपन्थः। तस्य स्वरूपं कथय।

श्रीअरविन्दः। भवद्भिर्ज्ञायते मया स्वेच्छातः आइ-सि-एस्-पदवीलोभः परित्यक्त इति हेतोः साम्प्रतं वक्रहृदय-हिंस्र-गुप्तचर-कृकलास-महोदयानां मयि कृपादृष्टिर्निपतिता। तत् भवतामत्र दीर्घावस्थितिं नाहं प्रार्थये।

सङ्कल्पः पुनरस्माकमीदृशो भवतु—

विज्ञानैरथ धर्मदर्शनकलाशास्त्रैश्चिरादुन्नता-
प्येषा भारतभूमिरद्य भजते कष्टां पराधीनताम्।
छित्त्वा पाशमिमं तदीयवदनं फुल्लं विधातुं वयं
कुर्मः किञ्चन कर्म देशहितकृद् यद् यस्य योग्यं भवेत्॥१२

विनयः। मयैष सङ्कल्पो देशमातृकानाम्ना सशपथं गृह्यते।

मोरोपन्थयोर्शी। मयापि। [सक्रोधम्] इयञ्चान्या मम प्रतिज्ञा – अहं सर्वान् इंराजान् भारतस्थान् अङ्गुलिनिघर्षणेन मत्कुणमारं मारयिष्यामि।

श्रीअरविन्दः। भ्रातः! मोरोपन्थ! नह्यकारणं रोषं पोषय। देशसमुद्धरणम् अस्माकं व्रतम्। व्रतकर्मणि पवित्रमेव सर्वं कार्यम् अनुस्रियेत। अकारणराजपुरुषवधेन किम्? भूयः शृणु—

क्रोड़ं भारतभूमिमातुरचिरादासाद्य भूयो मया
स्वातन्त्र्यानयनानुबन्धरुचिरा निष्पादनीया क्रिया।
नो याचे स्वसुखं न वा जनिभुवो देशस्य मातुः परं
सर्वेषां जगदोकसां सुखमहं विश्वेश्वरात् कामये॥ १३॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किञ्च,—

दिव्यानुभूतिः शुचि दिव्यजीवनं
द्वयं मया यन्निखिलस्य काम्यते ।
स्वाधीनतामाप्नुवतीह भारते
तत् स्यात् फलेनान्वितमन्यथा वृथा ॥१४

भारतवर्षमेव भगवतो युगयुगान्तरीय-दिव्यलीला-विहारभूमिः । देवभाषा भारती वाणी । सा दिशि दिशि प्रचरतु विश्ववासिभ्यो दिव्यजीवनदानाय ।

विनयभूषणः । साम्प्रतं सभाकार्यं समाप्तमस्माकम् ।

सर्वे । जयतु भारतजननी ; लसतु च भारतहृदयारविन्दम् । प्रसीदतु श्रीभगवान् ।

[मनोमोहनो योशी च निष्क्रान्तौ]

विनयभूषणः । अरविन्द ! अपि पितुः पत्रं समासादितम् ? कच्चिदर्थस्ते संप्रेषितः ?

श्रीअरविन्दः । नह्यग्रज ! मद्विषये काचन चिन्ता न करणीया । भगवानेव दाता ग्रहीता च, जगति सर्वमेव तदभिलाषानुसारि । पश्य,—

अचिन्तितं क्वचिदुपैति चिन्तितमपि नश्यति पश्यतोऽप्यस्य ।
नरस्य किं स्वातन्त्र्यं जयतीह भागवती करुणा ॥१५

विनयभूषणः । [सनिःश्वसितम्] न जाने परमस्नेहमयः पिता नः कामवस्थामापन्नः सम्प्रति वर्तते ।

श्रीअरविन्दः । सर्वं मे तस्मै भगवत एव समर्पितमास्ते । भारतवर्षस्य समुद्धारः प्रथमकल्पः, तदनु च विश्वस्य दिव्यजीवनलाभः ।

नमो भगवते वासुदेवाय । नमो भारतजनन्यै । अहो कदा नु चतुर्दशवर्षवनवासकालो मे पूर्तिमेष्यति, कदा वा कौशल्याजनन्याः क्रोडे स्थानं लप्स्ये ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हंहो भारतमातरश्रुमलिनं संशोधयास्यं स्वकं
किं त्वं रोदनतत्परा ननु गतेवैषा विषादक्षपा ।
एते ते तनयास्तृणीकृतभया द्राङ् मोचयिष्यन्ति ते
मातर्बन्धनशृङ्खलं त्वमयि नो वर्षाशिषो मूर्धसु ॥१६

मङ्गलमेव शाश्वतिकम् । वन्दे मातरम् ।

उभौ । वन्दे मातरं गर्भधारिणीं, वन्दे मातरं जन्मभूमिं, वन्दे मातरं विश्वजननीम् । मातृत्रयं युगपत् प्रसीदतु । नमो नमो नमः ॥

[निष्क्रान्तौ]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

द्वितीयः अङ्कः

प्रथमदृश्यम्

वरोदायां श्रीअरविन्दस्य वासगृहम्।

ततः प्रविशति श्रीअरविन्दः।

श्रीअरविन्दः। अहो! ऊनत्रिंशवर्षवयस्कस्य मे विवाहो जाने भगवदुद्दिष्ट एव। पितु र्मे लक्ष्यमासीत् देशजनन्याः सेवा। किन्तु विधातृ-विधानानुसारेण मम स्वदेशप्रत्यागमनफुल्लचित्तस्य बोम्बाइ-नगर्यां पोतादवतरणात् प्रागेव पिता मच्छोकादेव शेषनिःश्वासं त्यक्तवान्। सर्वमेतत् भगवदुद्दिष्टमेव। हा हन्त!

मरणं पितुरेतदतर्कितं विधिविधानमिति प्रतियन्नपि।
कथमप्यहमस्मि न निर्वृतः क्व नु पितस्तनुषे न किमुत्तरम् ॥१७॥

[त्वरितं प्रविशति मृणालिनी]

मृणालिनी। किं सर्वमेव भगवदुद्दिष्टम्?

श्रीअरविन्दः। बाढ़म्, यद् यज् जगति संघटते। मानवेच्छा सावधिः तस्मात् सर्वथा भगवत्येव आत्मसमर्पणं विधेयम्। पश्य! पिता मे पुत्रमेव जगति सर्वस्वममन्यत। ममालोकसागरमज्जन-दुःसंवाद-श्रवणेन पितुर्मे परलोकगमनम्, तत् केनासीन्निर्दिष्टम्।

यच्च त्वमपि मृणालिनि! सत्सु बहुषु सत्पात्रेषु स्वेच्छयैव आत्मानमुन्मत्तहस्ते समर्पितवती, यदपि च धनिनः पितुः आदरिणी कन्या त्वमद्य वरोदानगर्यां मम दीनकुटीरमलङ्कृतवती तत्तत् सर्वं भगवदिच्छैव। परं—

भर्त्तारं धृतराष्ट्रमन्धनृपतिं गान्धारराजात्मजा
कायेनाप्यनुकुर्वती स्वनयने वस्त्राञ्चलेनावृणोत्।
भावोन्मत्तमशान्तमानसमनासक्तञ्च कार्यान्तरे
स्वेच्छातः परिणीय मां त्वमपि भू र्मा साम्प्रतं तादृशी ॥१८॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

मृणालिनी। किमिति भवान् भवदादर्शग्रहणव्यवसायान्मां निवारयति? तदेवाहं जीवनं सफलं मंस्ये यदा तवैतद् देशसेवाव्रतं मम जीवने सर्वथा मूर्तं भविष्यति। किञ्च, यथा मातुर्गान्धार्या आदर्शानुसरणे समर्था भवेयं तथा तवाशीर्वादान् प्रार्थये। गान्धार्या जीवनस्य मूलमन्त्र आसीत् धर्मः। तयैव उद्घोषितम् "यतो धर्मस्ततो जयः" इति। धर्म एव ममापि जीवनं सफलं करोतु।

श्रीअरविन्दः। मृणालिनि! तवाभिप्रायं विज्ञातुं मया पूर्वं तथोक्तम्। परन्तु सुष्ठु त्वयोक्तम्। मम धर्मस्तव चैक एव। स धर्मो विश्वप्रेममूलको विश्वजनहितसाधनैकहेतुः। विश्वस्य हितसाधनायैव भारतवर्षस्य राष्ट्रियस्वाधीनता प्रथमं प्रयोजनम्। देशप्रेम एव श्रेष्ठो धर्मः।

विविधजड़समन्वयात्मिका न हि खलु देशजनन्यसौ मता।
वपुरिदमुदरे यया धृतं मम जननी तु सचेतनैव सा॥ १९॥

मातृभूमिर्मे स्वयं जनन्येव, मातृरूपेण तामहं पूजयामि, भक्तिञ्च तस्यै निवेदयामि।

मृणालिनी। अहो एष भावस्ते महात्मनो मातामहस्य प्रातःस्मरणीय-राजनारायणवसुमहोदयस्य भावधारानुसारी। देशप्रेम तस्यापि जीवनस्य सर्वस्वमासीत्। अहो! पादशब्द इव श्रूयते

[ततः प्रविशति श्रीअरविन्दस्य कनिष्ठभगिनी सरोजिनी। तृतीय-भ्राता वारीन्द्रश्च]

सरोजिनी। [स्वगतम्]

दीर्घात् कालात् परतो मदग्रजोऽयं परिणीय सुन्दरीम्।
व्यासक्तः संसारे स्वदेशचिन्तां बहुमंस्यते न वा॥ २०॥

[सहसितम्—कौतुकेन ललाटे कराघातं कृत्वा, प्रकाशं]—अहो! किमाश्चर्यमतः परम्! मध्यमाग्रजस्य शिक्षादानाभ्यासो गृहेऽपि प्रसारं लभते। भो भ्रातृवधु! वाकोवाक्य-प्रवीणे भूपालनन्दिनि!

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

कथं निःशब्दं वचनविन्यासं सहसे ? कं विषयमधिकृत्य साम्प्रतमुपदेशः प्रचलति ?

मृणालिनी। [सस्मितम्] परमादरिणि ननान्दः सरोजिनि ! किमत्यस्थिरा भवसि ? वक्तृताप्रदानविषये नाहं पश्चाद्गामिनी। [सचापल्यम्] सखि, अनभिज्ञासि त्वं मम पाण्डित्यस्य। तत् शृणु, मत् प्रियसख्यसीति केवलं त्वामेव वदामि।

चिरसेविताङ्ग्लभाषा स्वदेशभाषा त्वोष्ठान्तवासिनी मे।
सुखागपि न सपत्नी कालेऽष्टादशभाषाविलासिनी स्याम् ॥२१॥

[सर्वे उच्चैर्हसन्ति]

किन्तु साम्प्रतं देशप्रेम समाश्रित्य भ्राता ते भाषते। देशप्रेम-परिपूरित-मानसा एव साथकजन्मान इति ध्रुवमेव। कुतः ?

प्रेमैव तावद् भुवि दूरदुर्लभं
देशाश्रयं तच्च ततोऽपि दुष्करम्।
समुद्भवेद् भाग्यवशादिदं यदा
प्रेमा परेशेऽपि तदा प्रजायते ॥२२॥

श्रीअरविन्दः। (सस्मितम्) अहो ब्राह्मबालिकाशिक्षालयत आंग्लशिक्षां प्राप्तायास्तवापि हृदयं स्वदेशप्रेमजुष्टमिति मम परमानन्दः।

[स्वगतम्] भगवन् ध्रुवं दयामयोऽसि।

यदि मम भवेद् देशप्रेम्णः प्रिया परिपन्थिनी
मनसि विमृशन्नित्थं नासं पुरा तु कृतोद्वहः।
नियति-नियमादूढा येयं सदन्वयसम्भवा
तव हि कृपया सा मेऽन्वर्था विभो सहधर्मिणी ॥२३॥

सरोजिनी। [साभिमानम्]

अग्रज ! आंग्लशिक्षाप्राप्ताः किं देशप्रेमिका देशसेवका वा न भवन्ति ? किम् आंग्ल-शिक्षा-देशप्रेम्णोर्विरोधः शाश्वतिको यथा अहिनकुलयोः ?

वारीन्द्रः। [सरोषम्] भगिनि ! असौ विरोधः शाश्वतिक एव।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अहिनकुलयोर्विरोधः पशुजगद्विषयकः। प्रस्तुतविषयस्तु मानव-सम्पर्की तस्मादधिकतर-भयावहः। आंग्लशिक्षा भारतीयान् जड़मांस-पिण्डान् करोति।

शिक्षादीक्षाचारचर्याप्रचारा
येषामेते भारताद्दूरभिन्नाः।
स्वीया शिक्षा ग्राहिता तैर्विदध्याद्
देशप्रीते र्विच्युतान् भारतीयान् ॥२४॥

मृणालिनी। एवं चेत् कथं तच्छिक्षाभावित-चेतसोऽपि मातामहस्य देशप्रीतिः सर्वातिशायिनी ?

श्रीअरविन्दः। अयि मुग्धे, मैवं भण। जगति कति राजनारायणा वर्त्तन्ते ?

विदेशिशिक्षा नहि यं व्यकारयत्
स राजनारायण एक एव हि।
अतो न दृष्टान्तविधौ स गृह्यतां
व्याप्तिः कुतः स्याद्बहु दर्शनं विना ॥२५॥

वारीन्द्रः। सत्यम्, स्वदेशसमुद्धारस्तस्य महात्मनो जीवने स्वप्न आसीत्। अग्रजस्य मे पुनः स जागरितावस्थ एव।

श्रीअरविन्दः। [सस्मितम्] तत्र वारीन्द्रस्तु माङ्गलिक-प्रभातशङ्ख-निनादो ध्रुवमेव। किन्तु का पुनस्तत्र भूमिका सरोजिन्याः तस्य भ्रातृवध्वा वा ?

सरोजिनी। [सस्मितम्] शृणु भ्रातः! सम्बन्धादिमर्यादया अभिन्नहृदये आवां सरोजिनो मृणालिनी च शब्दार्थद्वारेणापि किञ्चिद्भिन्नमेकमेवार्थं वहावः। तेनारविन्दस्य ते सेवादिविधानेन सर्वथा समुज्जीवनमेवावयोरसाधारणं कर्म। किञ्च, देशहितैषणाव्रते तवावलम्बनीभूय देशप्रेममधुवर्धनेऽप्यावां सहकारितामारचयावः।

अयि मदग्रज जागृहि सत्वरं परमुखप्रणयं द्रुतमुत्सृज।
घटय भारतमातुरनिम्नतां विघटयन्नपरार्पित-शृङ्खलम् ॥२६॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीअरविन्दः। भगिनि! नितरामाप्लुतोऽहं तवानेन स्वदेशप्रेम-मधुवर्षिणा वचनसन्तानेन।

युष्माकं कुलरमणीशिरोमणीनां
स्यादेवं यदि हृदये स्वदेशहादम्।
सोदर्ये! न हि खलु भविष्यतीह मातुः
स्वातन्त्र्यानयनविधौ महान् विलम्बः ॥२७॥

सरोजिनी। भृशम् अनुगृहीताऽस्मि।

श्रीअरविन्दः। भ्रातर्वारीन्द्र! त्वं साम्प्रतं वङ्गदेशात् आगतोऽसि। का तत्रत्या वार्ता?

वारीन्द्रः। देशदुःखनिरासविषये सर्वथा समुद्युक्ता आसते वङ्गेषु भवत्प्रेरितो यतीन्द्रनाथवन्द्योपाध्यायः, व्यारिष्टार प्रमथनाथ-मित्र-महोदयस्तस्य सहकर्मिणश्च विभूतिभूषणभट्टाचार्यप्रमुखाः। तदिदमाशासे—

देशे देशे भवतु वितता देशभक्तिर्गरेण्या
कण्ठे कण्ठे ध्वनतु मधुरं कीर्तनं देशमातुः।
चित्ते चित्ते विलसतु नृणां मातुरौन्नत्यचिन्ता
यत्नोऽस्माकं भवतु सफलः क्षिप्रमास्थीयमानः ॥२८॥

फलतः, सर्वसौन्दर्येण विकशतु सरोजिनीमाला ॥

सरोजिनी। शृणुतम् अग्रजौ, सानुग्रहं शृणुतम्, अस्माकं मातृ-सङ्गीतम्।—

—[गायति]—

भारतजननी स्नेहप्रस्रविणी सिद्धिशिरोमणिर्भारते रे।
फुल्लं जायन्ते युगे युगान्ते रामकृष्णौ च बुद्ध-गौरौ रे ॥२९॥
विश्वसर्वहिता जननीश्रीसीता राधा-गोपा-विष्णुप्रियाः।
प्रभुकरधृताः कल्याणभूषिता जिष्णुविष्णुभवहितधिया ॥३०॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

हृदयारविन्द-मधुनिष्यन्दः कलौ वहतु भारते प्राणासारे ।
भारतमातृमणे हस क्षणे क्षणे दूरं यातु दुःखं मातः
सारात्सारे ॥३१॥

श्रीअरविन्दः—अहो ! मधुरमोहिनी सुधास्राविणी इयं गीतिः । स्नेहमयि भगिनि ! गृहाण ममाशिषम् ।

उद्बोधो जननीशक्ते र्नितरां काम्यते ध्रुवम् ।
मातृशक्तेरधःपातात् भारताधीनता स्थिरा ॥३२॥

पुरुषोत्तमो विजयताम् । बलीयसी खलु भगवदिच्छा ॥

[सर्वे निष्क्रान्ताः]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

Description of midnight

द्वितीयः अङ्कः

द्वितीयदृश्यम्

[श्रीअरविन्दसकाशे वारीन्द्रस्य अग्निमन्त्रदीक्षाग्रहणम् ।]

[श्रीअरविन्दो ध्यानमौन उपविष्टः शनैः शनैः प्रविशति तस्य भ्राता वारीन्द्रश्च]

वारीन्द्रः—[प्रणम्य] गुरो ! अयमागतोऽस्मि । प्रहरद्वयमतिक्रान्ता अमावस्यायामिनी । स्वयं धरित्री प्रसुप्ता इव । माता श्रीकालिका स्वीयमसीवर्णेन निखिलं जगत् लिम्पतीव । मृत्तिकाभ्यन्तरस्थजीववृन्दं समतानं रौति, सत्यं तथापि निस्तब्धा माता वसुधा स्तिमितेव ॥

कालयाः स्वेन मसीघनेन वपुषा स्पर्धामिवातन्वती
किं जाता वसुधा मसीतनुरमावास्या-वयस्यान्विता ?
यामिन्याः कथमन्यथा हि तिमिरं दुर्भेद्यमीदृग् भवेत्
दृष्टिर्न प्रसरेद्यथा किल नृणां प्रादेशमात्रान्तरे ॥३॥

श्रीअरविन्द :—अपि दीक्षाग्रहणस्य उपवासादिकः सर्वो नियमः त्वया परिपालितः ?

वारीन्द्रः—अथ किम् । विगते दिवसे हविष्याशिना मया अद्य प्रातः कृतं शुचिस्नानम् इदानीं यावत् न किमपि भुक्तम् । आद्याशक्तेर्नामजपक्रमेणैव यापितो दिवसः । देशमातृकाया रूपं मुहूर्तादपि हृदयान् मे नापगतम् । हृदयं मनश्च मे भारतमातृमयं सञ्जातम् ।

श्रीअरविन्दः—वारीन्द्र ! देशमातृकापादपद्मयोरात्मसमर्पणाय त्वं कृतसङ्कल्पोऽसि ?

वारीन्द्रः—वाढम् । [स्वगतम्] हन्त,

कालोनुकूलो गुरुरेष विप्लवी
शिष्योस्मि सन्त्रासनवादपण्डितः ।
सा देशमाता समुपास्यदेवता
मन्त्रः समिद्धो गुरुगोचरः परम् ॥३४॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीअरविन्दः। त्वदर्थं यज्ञपरिवेशो मया संसृष्टः। धूपदीपनैवेद्य-पुष्पचन्दनादिकं च सुसज्जितम्। गभीरायां यामिन्यां जननी श्रीकालिका तव पूजां ग्रहीष्यति। वारीन्द्र! अदूरे किं पश्यसि?

वारीन्द्रः। यज्ञोपकरणानि सर्वाणि। पुनः श्रीकालिकामूर्त्यभ्यन्तरे भारतमातरं मम जननीञ्च।

श्रीअरविन्दः। सम्यक्, जाने जननी स्वत एव तुभ्यं स्वच्छन्दोदृष्टिं सत्यदृष्टिं वा दत्तवती, नूनं पात्रमसि दीक्षायाः।

वारीन्द्रः। गुरो! परमनुगृहीतोऽस्मि।

श्रीअरविन्दः। अतो यज्ञो मया प्रारभ्यते। प्राङ्मुखस्त्वं दर्भमास्तीर्य कुशहस्तो मया सह यथालिखितं दीक्षासंकल्पमुच्चारय।

(लेखं वारीन्द्रार्पयति)।

वारीन्द्र। (पठति—)

अद्य माघे मासि, अमावास्यायां तिथौ श्रीकृष्णधन-घोषस्य चतुर्थ-पुत्रोऽहं

नत्वा पादयुगे करालवदनां कालीमनन्यव्रतः
श्रीवारीन्द्रकुमार-घोषज इदं संकल्पयाम्याहृतः।
छेत्तुं भारतमण्डले कृतपदं वैदेशिकं शासनं
कार्यं जीवननिर्व्यपेक्षमपि यत् कुर्यां तदद्यावधि ॥३५

किञ्च—

आच्छिद्याशु दृढं परैरतिचिरादासञ्जितं शृङ्खलं
श्रीमद्देशजनन्यनन्यशरणा यावन्न सा मोच्यते।
तावन् न्यस्य मया मदीयमखिलं तस्या जननयाः पदे
स्थीयेतैहिकसर्वभोगवितृषा सन्न्यासिनेवालये ॥३६

श्रीअरविन्दः। वारीन्द्र! यतस्त्वं मातृपदे करोषि आत्मसमर्पणं, ततोऽहं तव दक्षिणहस्ते श्रीश्रीगीतां वामहस्ते च असिं स्थापयामि। [संस्थाप्य] प्रतिजानीहि—एतयोः सम्माननमक्षुण्णं स्थास्यतीति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीवारीन्द्रः। गुरो ! तव श्रीचरणारविन्दं स्पृष्ट्वा प्रतिजाने अस्मिन् विषये न कदापि व्यत्ययो भविष्यति।

अरविन्दः।

निष्कामस्य हि कर्मणः प्रतिकृतिर्गीतेश्वरेणोदिता
खड्गश्चात्मपशुत्वखण्डनफलः शक्तेः प्रतीकश्च सः।
गीता चेतसि संस्थिता करगतः खड्गश्च येषां सदा
सेवायामधिकारितामधिगतास्ते देशमातुर्ध्रुवम् ॥३७

किञ्च असिः निष्कामकर्मणः सहायकः, न जिघांसाप्रवृत्तेः। निष्कामं कर्म परसेवामूलकं, जिघांसा स्वार्थमूलिका। निष्कामं कर्म लक्ष्यम्, असिः आत्मशोधनरक्षणोपाय एव।

वारीन्द्रः। गुरो !

असि-गीतयोः स्वरूपं संश्रुत्य भवन्मुखादविदितचरम्।
सुतरामुज्जीवितोऽस्मि संभावयामि चाजय्यमिव स्वम् ॥ ३८॥

अरविन्दः। यज्ञार्थं प्रज्वलितेऽग्नौ आहुतिस्त्वया प्रदेया। वारीन्द्र ! मया सह होमगाथामुच्चारय—

[सङ्गीतम्]

दूरीकुरु देवमुख पापभारं
देह-चित्त-कल्मष-गाढान्धकारम्।
याचे जडतादि-दोषापहारं
मरलोके दिव्य-जीवनप्रसारम् ॥३९॥

ततो हि जन्मभूमि-पूर्णसमुद्धारम्।
"एते गन्धपुष्पे अग्नये नमः" "एतद् हविः अग्नये स्वाहा"
इत्युक्त्वाग्नौ निक्षिप ॥

वारीन्द्रः। (तथा कृत्वा) गुरो ! परमनुगृहीतोऽस्मि। अनुभवामि किल नवीनं जीवनं मया लब्धम्। प्रवहति धमन्यां मे नवीनं शोणितस्रोतः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

उत्साहवह्निर्ज्वलतु प्रकामं
तवाशिषा देव समिद्धया मे ।
घोरान्धकारे चरतोऽवलम्बो
गुरोः कृपा दीपशिखेव मे स्यात् ॥४०॥

श्रीअरविन्दः । ममाशीर्धारा तव शिरसि निरन्तरं वर्षतु । दीक्षेयं तव जीवने पूर्णां सार्थकतामवाप्नोतु । वारीन्द्र ! शोभतां त्वयि निष्कामं कर्म । लसतु विघ्ननाशनासिस्तव । देशस्य सर्वत्र स्वदेशप्रेमशिक्षां विस्तारय ।

अपि च--

दीक्षा यथेयं भवते मयार्पिता
त्वयाऽपि देया ध्रुवमेवमर्थिने ।
एवं क्रमेण प्रतिदेशसेवकं
दत्ताऽचिरात् सा बहुलीभविष्यति ॥४१॥
गृहीतदीक्षा यदि लक्षसंख्या
निष्कामकर्माश्रयिणो भवेयुः ।
तदा मुखं हास्यसमुज्ज्वलं स्यात्
स्वदेशमातुर्गलितश्च पाशः ॥४२॥

वारीन्द्र ! तुषाग्निरिव ज्वालाहीनो न धूमायस्व ; चिराय प्रज्वलार्चिः-समन्वितः । दशदिशश्च प्रज्वलय । भारतजनन्या मलिनं शुष्कं वदनं सस्मितं कुरु ।

प्रसीदतु जननी श्रीश्रीकालिका ॥

वारीन्द्रः । गुरुदेव ! प्रकृतशिक्षादातारं बृहस्पतिस्वरूपं भवन्तं प्रणमामि ।

ॐ वन्दे मातरम् ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तृतीयोऽङ्कः

सुराट-कंग्रेससभामण्डपाभ्यन्तरकक्षे

आलापरतौ तिलकारविन्दौ ।

श्रीअरविन्दः । तिलकमहोदय ! यद्यपि प्रदेशान्तरे कंग्रेसाख्य-जातीयमहासम्मेलनस्य अधिवेशनस्थानं निर्णीतमासीत्, तथापि मडारेटाख्य-मध्यमार्गिनां व्यवस्थापनया तेषामेव सौकर्यार्थं सौराष्ट्रे एवास्मिन् वर्षे अधिवेशनस्थानं प्रकल्पितम् । अतः सुदूर-वङ्गदेशाद् वयं सौराष्ट्रमागताः । सार् फिरोजशाहमेहता-महोदयेन सह वङ्गीय-नायकस्य श्रीसुरेन्द्रनाथ-वन्द्योपाध्यायमहोदयस्यैकमत्यमपि दुःखजनकम् । प्रसिद्ध-बुद्धिजीवि-श्रीरासविहारिघोषमहोदयोऽपि मध्यमार्गिनां मत-मनुसरति । तथापि, वङ्गेषु साम्प्रतं पूर्णस्वाधीनताकामिनां संख्या गरीयसी । यदुच्यते राजपुरुषैरौपनिवेशिक-स्वाधीनता वा स्वायत्तशासनं वा तन्नितरामसारम् । किमिति तैः स्तोभवाक्यैः वयं नितरां प्रलोभिताः सारपदार्थाद् दूरं नीयमानास्तिष्ठामः ?

श्रीतिलकः । घोषमहोदय ! एतन्ममापि अभिमतम् । प्राग् भारत-वर्षस्य स्वातन्त्र्यं तदनु मानवता, तदनु भवत्वन्यत् सर्वम् । भारतवर्षं विश्वस्य हितायैव चिराय राजते । बृटिश-शासनाद् भारतवर्षस्य मुक्तिरपि जगतो हितायैव कल्पिष्यते । भारतीयोऽध्यात्मवाद एव जगच्छिक्षणविषयः । स्वाधीनं भवेच्चेद् भारतवर्षम्, अस्माकं सम्माननं भविष्यति जगद्व्यापि । साम्प्रतं किं त्वया कर्तुमिष्यते ?

श्रीअरविन्दः ।

यद्वङ्गभङ्गजनितं विपुलं नराणा-
मान्दोलनं समजनिष्ट पुरात्र देशे ।
सुस्थिश्चिराय विलयं लभते स्म तस्मा-
दास्ते तु वर्षमिदमद्य समुज्जिहानम् ॥ ४३ ॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किञ्च,—

कृतपदा बहवोऽत्र सुसेवकाः
फलविनाकृतकर्मविधायकाः ।
अवसरे सति ये निजजीवनं
तृणवदेव विहापितुमीशते ॥४४॥

किन्तु नास्माकं स्वाधीनतावादः सिनफिन् वादानुकारी। तस्मान्मया मेदिनीपुरमण्डले गुप्तसमितिसदस्यपदप्रापणाय दीक्षा-दानकाले हेमचन्द्रदासस्य एकस्मिन् करेऽसिः. अन्यस्मिंश्च गीता दत्ता। एषैव रीतिरस्माभिरनुस्रियते वङ्गेषु।

तिलकः। मम मतमपि चिराय धर्माश्रयि। धर्महीनां राजनीतिमहं तृणाय मन्ये। पश्य,

धर्मे विश्वासहीनो यदि भवति जनो राजनीतौ विनीतो
हिन्दुर्माहम्मदो वा न हि खलु सुफलं तेन लभ्यं कदाचित्।
येयं सेवा जनन्या निजजननभुवः सापि धर्मान्न भिन्ना
तस्माद्देशानुरागो भवतु कथमहो मानवे धर्महीने ॥ ४५ ॥

श्रीअरविन्दः। तिलकमहोदय! यद्यपि धनागारलुण्ठनं प्रदेश-शासकनिधनमित्यादिकं नास्माकम् अभिप्राय-सिद्धिहेतुकम्, तथापि निखिलभारतवर्षस्य सशस्त्रजागरणमभीप्सितमेव। सर्वत्र युगपत् कार्यकारिता भविष्यति सिद्धिदा।

तिलकः। अस्मिन् विषये वङ्गेषु के आसते उद्युक्ताः?

श्रीअरविन्दः। सखाराम-गणेश-देउस्कर-वारीन्द्रोपेन्द्र-यतीन्द्रवन्द्योपाध्याय-प्रमथनाथमित्रप्रभृतयः। भगिनी निवेदिता च विशेषेणात्र सहायताविधायिनी अस्माकं पञ्चजनसमितेरन्यतमसदस्या च।

तिलकः। एतद्विषये अस्माकमालपनं पश्चाद् भविष्यति। साम्प्रतं प्रारप्स्यते कंग्रेसस्याधिवेशनम्। तदत्र प्रकृतविषये भवतां किमभिमतम्?

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीअरविन्दः। ममाभिमतं सुस्पष्टमेव। वर्षद्वयात् प्राक् भवानी-मन्दिरपुस्तिकायां यन्मया लिखितमासीत्तदेव मे मतमपरिवर्तितमास्ते।

ममेप्सिततमं नवं किमपि भारतं शक्तिमत्
तदेव जगतो हितं सुवहु साधितुं शक्नुयात्।
अचञ्चलमनाकुलं गलित-भीति जाड्योज्झितं
मनो भवतु वीर्यवत् प्रतिजनं नवे भारते ॥४६॥

एतदर्थमेव भारते जन्म लेभे श्रीरामकृष्णपरमहंसदेवः, श्री-विवेकानन्दश्च। किन्तु—

शक्तेरभावाद् विपुलापि भक्ति-
र्ज्ञानं च नो न स्फुरतः प्रकामम्।
स्फूर्तिर्यथा स्यादनयोस्तदर्थम्
ओजस्वि कर्म ह्यनुशीलनीयम् ॥४७॥

अत एव कालीमर्चयामास श्रीरामकृष्णः, तया च स एकीबभूव। सौभाग्येन ओकाकुरा-दत्तानुप्रेरणया घोषालजा तत्रभवती सरला प्रमथनाथमित्रश्च कार्यक्षेत्रे समवतीर्णौ राजेते।

[प्रविशति कश्चन स्वेच्छासेवकः]

स्वेच्छासेवकः। आर्यौ! भवतोः सकाशमागमनं वाञ्छन्ति फिरोज-शाह्-मेहता-श्रीसुरेन्द्रनाथवन्द्योपाध्याय - श्रीअश्विनीकुमारदत्त - महोदयाः, चरम-मध्यमार्गिणः सेवकाश्च।

श्रीअरविन्दः। अहमपि तेषामागमनं प्रार्थयमान आसम्।

[ततः प्रविशन्ति यथोक्ता नेतारः]

श्रीअरविन्दः। [उत्थाय] शुभागमनमस्तु भवताम्।

श्रीसुरेन्द्रनाथः। तत् सर्वं युवयोश्चिन्तासौष्ठवापेक्षि।

तिलकः। कलिकाता कंग्रेसाधिवेशने अस्माभिर्ये प्रस्तावा परि-गृहीतास्त एव वर्तमानाधिवेशनस्य भित्तिरूपा भवेयुश्चेत् सर्वमेव सुष्ठु भविष्यति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीअरविन्दः। वाढम्। ममाप्येतदेवाभिमतम्।

श्रीसुरेन्द्रनाथः। [स्वगतम्]

यदेव दूरतो मया विहातुमिष्यते चिरात्।
अनेन तत् पुरस्कृतं किमत्र योग्यमुत्तरम्? ॥४८॥

भवतु, विषयान्तरमाश्रित्य प्रकृतं परिहरामि। [प्रकाशम्] तिलक-महोदय! तिष्ठतु तत् परं कः सभापति-पदे वृतः स्यात्तद्विषयकः प्रश्नोऽपि मनसि मे जागर्ति। मन्मते श्रीरासविहारिघोषमहोदय एव गरिष्ठः।

तिलकः। किन्तु पाञ्जावकेशरी लालालाजपत्राय एव योग्यतम इति घोषमहोदयस्य मम च मतम्। एतद्विषये मुञ्जे-खारे-खपर्दे प्रभृतीनामप्यैकमत्यम्।

श्रीसुरेन्द्रनाथः। हन्त, अत्रापि युष्माभिः साकमहमैकमत्यं स्थापयितुमसमर्थः। तस्मान्मया प्रस्तूयते कंग्रेसमहामण्डलस्य नियमानुवर्तिनी काचन परिचालन-समितिर्विधेया। सैव समितिः सभापति-निर्वाचनं करिष्यति।

श्रीअरविन्दः। अस्तु तत् किन्तु पूर्णस्वाधीनतैव कंग्रेसस्य मूललक्ष्यं स्यादिति मे दृढं मतम्।

श्वेतद्वीपनिवासिनां मदजुषामस्माभिरङ्घ्रिश्रितै-
स्तोषामोदविदग्धया हतधिया स्वाधीनता दुर्लभा।
स्वातन्त्र्यं न हि दीयते परमिदं शक्त्या स्वयोपार्ज्यते
भिक्षावृत्तिसमर्जितेषु महतां श्रद्धा कुतो वस्तुषु ॥४९॥

श्रीसुरेन्द्रनाथः।

दुराशा किल कंग्रेसाभ्यन्तरानैक्य-खण्डनम्।
यद्वा नायकबाहुल्यं भवेदेव भिदास्पदम् ॥५०॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीअरविन्दः। युक्तं वा स्यात् कंग्रेस-मण्डलम् अयुक्तं वा, भारतवर्षस्य पूर्णस्वाधीनताऽस्मिन्नेव अधिवेशने उद्घोषयितव्या—

जागर्ति देशः सुतरामिदानीं नह्यस्ति तन्द्रा खलु लेशतोऽपि।
नेतृत्वमुर्जस्वलमाप्तुमुत्का वङ्गा महाराष्ट्रमुखाश्च देशाः॥५१॥

तिलकः। भीतिर्नाम मध्यपथानुगामिनाम्।

मध्यमार्गी सेवकः। [सक्रोधम् तिलकं प्रति धावति] किमुक्तं ? मध्यमार्गिणां भीतिर्न तु चरममार्गाणामाकाशकुसुमवादिनां मध्याह्ने मार्तण्डदाहसमये चन्द्रांशु-शिशिरद्रवप्रार्थिनाम्।

चरममार्गी सेवकः। [सक्रोधं मध्यमार्गिसेवकं प्रति धावति] धिक्! धिक्! मध्यमार्गिणाम्। न वयं चरममार्गा ब्रिटिशराजानुग्रह-प्रार्थिनः। प्रार्थनायाः को विषयः ? केवलं पदलेहनेन न कदापि मनोऽभीष्टं सिध्यति। आत्मबलं सर्वदापेक्षितम्। हस्तसंप्रसारण-क्रमेणैव पादलेहनबलात् भारतवर्षस्य स्वाधीनता भविष्यति इति शश-शृङ्गस्येव अलीक-वस्तुनः कल्पना एव। अस्माकं अभीष्टसिद्ध्यर्थं कंग्रेसकर्मकर्ता लालालाजपत्राय एव सभापतिर्भविष्यति।

मध्यमार्गी। कदापि न। ततः श्रीरासविहारिघोषो गरीयान्।

(नहि नहीति विरुद्धपक्षीयाणामारावः श्रूयते।)

[क्रमेण उभयपक्षीययोः मुष्टामुष्टियुद्धम्।]

श्रीअरविन्दः। [स्वगतम्] अहो! किमेतदापतितम् ? जननि भारतभूमे!

फलमविकलमेकं लिप्समानावपीष्टे
पथि तु विवदमानौ द्वावमू सभ्यसङ्घौ।
कलितविपुलकोपौ हन्त सुन्दोपसुन्दा-
विव मरणमकाले प्राप्नुयेतां किमम्ब!॥५२॥

बन्धवः! शान्ता भवत। जनमतानुसारेण सभापतिविनियोगो भविष्यति। मुष्टामुष्टियुद्धेनालम्।

[सर्वे निष्क्रान्ताः]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चतुर्थोऽङ्कः

प्रथम-दृश्यम्

[श्रीअरविन्दस्य ग्रे-ष्ट्रीटस्थ-नवशक्तिपत्रिका-
कार्यालयरूपं वासभवनम्]

भक्त-कविः। [गायति राजमार्गे]

नेत्रयुगल—गलदविरल—सलिलसिक्तवासा।
ह्रीणवदन—विदितदीन—भाव-मलिनहासा ॥५३॥
अशनविरह-बहुदुःसह-कृच्छ्रशिथिलकाया।
परनिर्भर—भृशजर्जर—वपुषि गलितमाया ॥५४॥
जननी मम वहति विषम-दैन्यमनघशीला।
वसति किमिति हृदि संप्रति मोहमय-निमीला ॥५५॥
क नु सन्ताना जागृत दीना
दवयत जननीदैन्यमपारम्।
श्वेतद्वीपान् गमयत पापान्
लघयत भारतधरणीभारम् ॥५६॥

[श्रीअरविन्दः चिन्तापरायणः]

भारतवर्षस्य दुःखापनोदनाय चिन्ताकुलः पिता मे पूर्वं प्रवासिने मह्यं प्रायशः पत्रिकांशान् संप्रैषयत्।

ततः प्रभृति मे इयं केवला चिन्ता—कथं वा भारतवर्षस्य परहस्तकवलात् समुद्धारः स्यात्। परमसौभाग्याद् भ्राता मे श्रीवारीन्द्रो भारतजनन्या दुःखनाशाय बद्धपरिकर आस्ते। तथा उपेन्द्रोऽन्ये च। खण्डशः सन्त्रासवादे न मे विश्वासः, तथापि देशस्य तरुणा विप्लवमुखेन मातुः समुद्धरणं कर्तुमिच्छन्ति चेत् तत्र भगवान् एव प्रमाणम्। परमकरुणामयः सहायो भवतु।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तरुणा अरुणायन्ते प्रतापसूर्यस्य भारतीयानाम् ।
तेषां स्वच्छन्दगतौ ततोऽन्तरायोऽस्माभिर्न विधेयः ॥५७॥

किन्तु के वा ते मजःफरपुर-हत्याकारिणः ? माणिकतला-विस्फोरणयन्त्र-निर्माणालयश्च शासकैः साम्प्रतमाविष्कृत इति कृत्वा बहवः पुनः अत्याचारिता भवेयुः ।

अहो हृदयहीनता विदेशीयशासकानाम् !

कृशमपि यदि कुर्याद्विप्लवं क्वापि कश्चिद्-
भवति भरतभूमिः कम्पमानाऽखिलाऽपि ।
अगणितगुणदोषैः शासकैर्निर्विचारं
स्थविर-शिशु-युवानस्ताड्यमाना भवन्ति ॥५८॥

किञ्च—

असतोऽप्यपराधांस्तैः ख्यापयद्भिरनागसः ।
क्लिश्यन्ते न कियन्तो वा सूचीवेधादिपीडनैः ॥५९॥

अयं "नवशक्ति"-कार्यालयोऽपि शासनपक्षकर्तृस्थानीयानां दृष्टि-पथमायास्यत्येव ।

[ततः प्रविशति आग्नेयास्त्रहस्तः पुलिशसुपारिण्टेण्डेण्ट्,
क्रेगान महाशयः, विनोदवाबुप्रभृति-
कर्मचारिभिः सह]

विनोदवाबुः (C. I. D.) । [दूरतः अरविन्दं निर्दिश्य—क्रेगानं प्रति] महाभाग ! एष एव दलपतिर्विप्लविश्रेष्ठः श्रीअरविन्दघोषः यः कार्यतः "वन्देमातरम्" पत्रिकासम्पादकः, "नवशक्ति" पत्रिकायाश्च प्रकाशकः, "युगान्तर"-पत्रिकायाः परिचालकस्य वारीन्द्रस्य च भ्राता ।

क्रेगानः । नहि नहि, नायं जीर्णवस्त्रपरिहितो दीनहीनो डक्टर कृष्णधनघोषस्य सन्तानो भवितुमर्हति । लण्डन-प्रत्यागतः केम्ब्रिज-विश्वविद्यालयस्य समुच्चोपाधिधारी न कदापि ईदृशे दीनजीवनयापने समर्थो भवेत् । त्वं सर्वथा भ्रान्तोऽसि ।

भवतु—अहं स्वयमेनं पृच्छामि । [श्रीअरविन्दमुद्दिश्य] रे !

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

नेटिभभृत्य ! शृणु। कार्यव्यपदेशात् अरविन्दघोषस्यानुसन्धानाय आगतोऽस्मि ! कुत्रासौ तव प्रभुः ? नूनं गृहस्य परिचारकस्त्वं, मृषा भाषसे चेत् अचिरादेव श्वशुरालयं गमिष्यसि।

श्रीअरविन्दः। सत्यमेवाहम् अरविन्दनामधेयो भारतजनन्या भृत्यः, दासानुदासः। किन्तु दीनेन मया सह किं भवतः प्रयोजनम् ?

विनोदवाबुः। अहं सत्यमेवाकथयमेष एव अरविन्द इति।

क्रेगानः। बृटिशशासनकर्तृस्थानीयानां त्वं परमहितैषी इति कृत्वा भारते बृटिशशासनस्य हितसाधनव्यपदेशेन त्वत्सकाशे आगतोऽस्मि। किन्तु कुत्र ते भ्राता वारीन्द्रः ? कुत्र वा श्रीमान् उपेन्द्र-वन्द्योपाध्यायः, तव परमबान्धवः ?

श्रीअरविन्दः। तयोर्विषये नाहं किमपि वदिष्यामि।

क्रेगानः। भारते विद्रोहदावानलस्य प्रज्वलनकर्ता त्वमसि इति हेतोस्त्वां कारारुद्धं कर्तुमहमत्रागतोऽस्मि। यद्यपि कायेन क्षीणोऽसि, तथापि वचनपावकसञ्चालने सुदक्षोऽसीत्यत्र तव प्रथमोत्तरमेव प्रमाणम्। किन्तु सिंहहस्तगतस्य मृगशिशोस्ते दर्पः कियत्कालपर्यन्तं स्थायी भविष्यति ? मार्जारं दृष्ट्वा व्याघ्रस्य बलं मापयसि त्वम् ? इंलण्डीय-विश्वविद्यालये शिक्षामधिगम्य इंलण्डस्यैव मूलमुत्पाटयितुं यतसे ? अहो कृतघ्नता, अहो दुरन्तता। कृतघ्नस्य हननमेव केवलं प्रायश्चित्तम्। विनोदबाबो ! एनं रज्जुबद्धं कुरु।

[विनोदवाबुः इतस्ततोऽवलोकयति]

श्रीअरविन्दः। अयि स्वदेशसेवक ! यथा भवान् स्वदेशहेतोर्यतते तथा अहमपि कथं न यतेय ? स्वदेशप्रेम न कदापि दोषकारणं भवति। यथा मे देशवासिनः सुष्ठु जीवनयापनं कर्तुं शक्नुयुस्तदर्थमेव अहं यते। तेन तव देशस्य हानिः कथं भवेत्। अथ चेद् भवति, किमहं तत्र कुर्याम् ? पश्य—

स्वदेशसेवा यदि दोषमावहेद्
दोषाय सा स्यात्तव देशसेविनः।
न हिंसकोऽहं तव देशवासिनां
महेशिनामुन्नतये यते परम् ॥६०॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्रेगानः। [सरोषम्] अयि कृष्णकलेवर पापचारिन्! पुनः स्पर्धसे ? अन्येद्युः मजःफरपुरे इंलण्डीय-भद्रमहिलाहननेनापि न ते जिघांसा चरितार्थतां गता—यतो भूयोऽपि विस्फोरण-निर्माण-कार्यालयं स्थापितवानसि ?

श्रीअरविन्दः। सत्य वदामि, अस्मिन् विषये अहमनभिज्ञोऽस्मि। नास्मि च प्रत्युत्तरदानक्षमः।

क्रेगानः। तस्माद्धेतोः लण्डनप्रत्यागतः सन् अपि तम परिवृते "नवशक्ति"-कार्यालये शक्तेः परिक्रमणम् अभिलषसि ?

[इतस्ततो विलोक्य]

विनोदबाबो! किमेतत् प्राचीरोपरि अग्नियन्त्रचूर्णवत् लक्ष्यते ? [स्वगतम्] अथ यद्ययम् एतस्य चूर्णस्य प्रयोगकौशलं प्रदर्शयति ?

विनोदबाबुः। किमेतत् घोषबाबो ?

श्रीअरविन्दः। मम पत्न्या संगृहीतमेतत् श्रीरामकृष्ण-पादस्पर्शपूतं दक्षिणेश्वर-श्रीभवतारिणीमन्दिर-रजः अशेषकल्याणकरमेतद् वस्तु।

विनोदबाबुः। भवता श्रुतं यदेतेन उक्तम् ?

क्रेगानः। [सरोषम्] नहि नहि, एष गुप्तदलपोषणकृन्महाधुरन्धरः। मन्दिरधूलिर्न कदाप्येतादृशीं मलिनतां भजते। नहि, नहि, अग्निचूर्णमेतत्। दूरमपसारय। दूरे क्षिप तच्चूर्णम्।

विनोदबाबुः। मन्ये भोः! नैतादृशो जनः कदापि मृषा भाषते।

क्रेगानः। तस्मात् त्वमप्येतस्य संस्पर्शाद् बृटिशविरोधी जातोऽसि ? अयि कृष्णकाय कापटिकदलपते! अचिरेणैव समुचितशिक्षां लप्स्यसे।

श्रीअरविन्दः। देशवासिनां समुचितशिक्षालाभायैव सततमहं यत्नपरवशोऽस्मि।

चिराद्यतेऽहं मम देशसंस्थान् यथोचितां लम्भयितुं सुशिक्षाम्।
लभेय ताश्चेदनुकम्पया ते तदा कृतार्थोऽहमिति प्रतीहि ॥६१॥

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

क्रेगानः ।

एषोऽहं ते ददामि शिक्षां तादृशीमिच्छसि यदि लब्धुम् ।
न केवलमत्र लोके स्मरिष्यसि यां भवान्तरेऽपि ॥६२॥

श्रीअरविन्दः । किं वाग्बाहुल्येन ? भवता यत् करणीयं तत् समयक्षेपं विनैव करणीयम् ।

अलं वाचां प्रपञ्चेन कुरु कर्तव्यमात्मनः ।
देशप्राणो न भीतः स्यात् खधूपगोलकैरपि ॥६३॥

क्रेगानः । अहो स्पर्धा कृष्णकायानां वर्वराणाम् ।

[वंशीध्वनिं करोति]

विनोदबाबो !

दृढबन्धं बधानैनं गुणैरायसकर्कशः ।
असतामीदृशां लोक एष एवोचितः क्रमः ॥६४॥

श्रीअरविन्दः । महोदय ! रज्जुबन्धनेन न घटते आत्मबन्धनम् ।

[प्रविशति द्रुतं मध्यमार्गिनायकः श्रीभूपेन्द्रवसुमहाशयः]

भूपेन्द्रवसुः । [उच्चैः सरोषम्]

आ धिग् भारतसभ्यताप्रतिकृतिर्नेता च देशेऽखिले
प्रज्ञावानरविन्द एष भवता संयम्यते चौरवत् ?
मुञ्चैनं द्रुतमन्यथा तु नयतो युष्मानिमं संयतं
संघीभूय जनाः प्रसह्य गणशो मार्गे निहन्युर्ध्रुवम् ॥६५॥

किञ्च—

लोका उद्दीपितामर्षा वर्तन्तेऽद्य स्वभावतः ।
तत्रैनं संयतं कृत्वा मा हौषीरनले हविः ॥६६॥

क्रेगानः । अहो एष सार् भूपेन्द्रवसुमहोदयो वङ्गराज्यशासक-महोदयस्य परमबन्धुः । नास्य वचनम् अतिक्रमणीयम् । विनोदबाबो ! यथा वसुमहोदयो वाञ्छति, तथा कुरु ।

(अरविन्दमादाय सर्वे प्रस्थिताः)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चतुर्थोऽङ्कः

द्वितीय-दृश्यम्

[देशद्रोहापराधेनाभियुक्तः श्रीअरविन्दो विचारालयमानीतः। विचारपतिः विचक्रफ्टः समासीनः। दण्डायमानौ सर्वकारीय-व्यवहाराजीवो मिष्टार नर्टनः श्रीअरविन्दस्य व्यवहाराजीवो व्यारिष्टारः चित्तरञ्जनदासश्च]

विचारपतिः विचक्रफ्टः। [स्वगतम्] अहो स एवैषोऽरविन्दघोषो यो मया सह इण्डियान सिभिलसार्भिस परीक्षायामुत्तीर्योपि स्वेच्छया आत्माधिकारमत्यजत्।

अस्मद्देशे स्थितः सन् परमपटुरभूच् शिक्षया दीक्षया च
योऽयं घोषोऽरविन्दः स हि परमधुना भावमन्यं प्रपन्नः।
यद्वा तद्वाऽस्तु दत्तो मदुपरि यदयं सत्यसिद्धान्तभार-
स्तस्माच्छुद्धिः कथं स्यात् सुहृदि मम पुरोभागिता चापि न स्यात्॥६६

अथास्य को दोषः? यथा मे जन्मभूमिः इंलण्डदेशः, तथाऽस्य भारतवर्षम्। एवञ्च स्वस्य देशस्य उन्नतिहेतोः कथमेष वा न यतेत। तत्र को दोषः?

[श्रीअरविन्दमुद्दिश्य] घोषमहोदय! आलिपुर राजकीयव्यवहारालये 'माणिकतला-त्रम्बकेश' समाख्यो योऽयं विस्फोरण-यन्त्र-संश्लिष्टो वर्षकाल-व्यापी व्यवहारः, स इदानीमन्तिमपर्वाणि वर्तते। सर्वकार-पक्षीयैर्भवत्-पक्षीयैश्च व्यवहाराजीवैः साक्षिभिश्च यद् यत् कथितं तत् सर्वं भवता श्रुतम् इति मन्ये। अपि राजद्रोहं द्वारीकृत्याभियुक्तस्य भवत आत्मदोष-क्षालनार्थं किमपि वक्तव्यमास्ते?

श्रीअरविन्दः। माननीय विचारकमहोदय!

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भवता मह्यं वचनावसरो दत्त इति हेतोः कृतज्ञोऽस्मि। प्रख्यात-व्यवहाराजीवेन चित्तरञ्जमदाश-महोदयेन पारिश्रमिकं विना सुचिरं मत्पक्षमवलम्ब्यास्मिन् विवादास्पदे विषये सुचिन्तितं बहूक्तम् अतः परमपि वदिष्यति च। तथापि स्वल्पं किमपि वच्मि।

स्वाधीनतादर्शविघोषणञ्चेद् दोषो भवेत् काममहं हि दूष्यः।
किन्त्वेतदेकं मम जीवनस्य सर्वास्ववस्थासु चिरस्य लक्ष्यम् ॥६८॥

किञ्च—

अयं यदि स्याद्व्यवहारहेतुर्व्यर्थो वतायं विपुलो विवादः।
अज्ञं च तैस्तैर्व्यवहारजीवैर्दोषं तमङ्गीकुरुतेऽभियुक्तः ॥६९॥

भारतवर्षस्य स्वाधीनताहेतोः जीवनस्य सर्वास्ववस्थासु जलाञ्जलिदत्तः, वरदाराजधानीतोऽस्मि कलिकातानगर्यां प्रत्यावृत्तः, एतदर्थमेव जीवनमहं धरामि। यथा जागरणे तथा निद्रायाम् अयमेक एव मे स्वप्नः।

किन्तु तत्त्वतो मया किं कृतम्? पाश्चात्त्यराजनीतिमूलतत्त्वानि परिगृह्य तैः सह वेदान्तस्यामरशिक्षायाः कृतः समन्वयः। प्राच्यपाश्चात्त्य-समन्वयमूलक आदर्शो देशस्य हिताय प्रचारितः। एतत् प्रचारणमेव मम जीवनव्रतम्।

विश्वस्य जातिपुञ्जे भारतवर्षस्यास्ते विशिष्टं स्थानम्। विश्वमानव-प्रगतिहेतोर्भारतवर्षस्य करणीयमपि बहुतरमास्ते इत्यादि विषयेषु देश-वासिनामुपलब्धिजननं ममावश्यं कर्तव्यम्। तदेव मे महाव्रतम्। सर्वात्मना मया एतद्व्रतमनुष्ठीयते।

अयमेव अपराधश्चेत् शास्तिर्भवता मह्यं निश्चितं प्रदेया। कारावरोधः शृङ्खलाबन्धनम् अन्यद्वा यद्भवतामभीष्टं तत् सर्वं मम भवतु नाम। किन्तु न विवेकः कदाऽपि स्वीकरोति यत् स्वाधीनताप्रचारेण अपराद्धोऽस्मीति। सर्वदेशस्य सुशासनाय स्वदेशस्वाधीनताप्रचारो न कदापि अपराधविषयो भवितुमर्हति। स्वदेशप्रेम न दोषः, कदापि न कदापि न।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

सर्वे। साधु! साधु! धन्यः श्रीअरविन्दघोषमहोदयो धन्यः। ओजस्विनी देशप्रेमोद्बोधिका चेयं महती वाणी!

विच्क्रफ्ट्। [नर्टनमुद्दिश्य] सरकारपक्षीय-व्यवहाराजीव नर्टन-महोदय! अतः परं लेख्य-प्रमाणादिकं यद् यदुपस्थापनीयमास्ते भवता, तदुपस्थानीयम्।

नर्टनः। माननीय महाभाग! अत्र पश्यतु भवान् पत्रमेकं (पोष्टकार्डं) श्रीवारीन्द्रघोषेण लिखितम्। तत्र स्पष्टमेव उल्लिखित-मास्ते यत् "एष समयो मिष्टान्न-वितरणस्य" इति।

विच्क्रफ्ट्। तेन किम्?

नर्टनः। अस्य स्फुटार्थः "एष एव समयः अग्नियन्त्र-साहायकेन सन्त्रास-विस्तारस्य" इति।

चित्तरञ्जनः। [सरोषं मुष्ट्याघातपूर्वकम्] माननीय विचारपति-महाशय! अत्रास्ते मे महती विप्रतिपत्तिः। अहो चमत्कारकारिणी बुद्धिर्नर्टनमहोदयस्य! "मिष्टान्नं" स्याच्चेत् "वम्बाख्याग्नेय"-वस्तु तन्मतेन, मयाऽनुरुध्यते नर्टनमहोदयः श्रीरामपुरमहाविद्यालयं गत्वा सुचिरं वङ्गभाषाभ्यासं करोतु इति।

सर्वे। [उच्चैः हसन्तः] साधु! साधु!

चित्तरञ्जनः। पुनः, मह्यं त्वेतत् पत्रं परीक्षणयोग्यमपि न प्रतिभाति। हस्ताक्षरपरीक्षणादिपूर्वकं पत्रप्रेषण-दिवसादिकं सम्यग् विचार्यते चेदेतत्पत्रं विचारास्पदमेव न भविष्यतीति ध्रुवमेव।

नर्टनः। अप्यत्र प्रथमप्रतिवादिनोऽभियुक्तस्य श्रीअरविन्दघोषस्य किमपि वक्तव्यमास्ते?

विच्क्रफ्ट्। तेन प्राथम्येनैवोक्तं यद् यद् भाषणीयं तत् सर्वं तस्य व्यवहाराजीव एव वदिष्यतीति।

नर्टनः। राजद्रोहरूप-महापराधाभियुक्तस्य मतं कथं गणनीयं स्यात्? कथं नासौ स्वयं किमपि वदतु?

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चित्तरञ्जनः। यदि वयं न प्रत्युत्तरक्षमा भवेम, तर्हि तेन प्रश्नस्योत्तरं प्रदातव्यं स्यात्।

नटनः। [सरोषम्] प्रतिवादिनो व्यवहाराजीवस्य सर्वमेव बलावलेपसूचकम्।

चित्तरञ्जनः! भो नर्टनमहोदय!

स्वाख्येयं मयि निधाय यदहमनेन पुरा प्रतिनिधिः कृतः।
तन्मय्यत्तुरदक्षे किमित्ययमुत्तरं विदधातु ॥७०

मया तु कथ्यते—

अलीकं कृतकञ्चैतत् पत्रं दुर्बुद्धिभावितम्।
वारीन्द्रमरविन्दं वा नैतत् संबन्धुमर्हति ॥७१

बीचक्रफट्। अभियुक्तव्यवहाराजीव दाशमहाशय! परीक्षणमपेक्षते चेत् पत्रमिदं, निपुणं परीक्षतां भवान्।

[पत्रं चित्तरञ्जनस्य हस्ते ददाति]

चित्तरञ्जनः। [परीक्ष्य। विहसन्] कथमत्र संप्रेषणालयस्य नाम त्रुटितं. प्रेषणदिवसो वा नात्र चिह्नितः?

बीचक्रफट्। मह्यं दीयतां पत्रमिदम्। अहं स्वयं निरीक्षे। [निपुणं परीक्ष्य] अहो सत्यमेवास्य पत्रस्य चिह्नादिकम् अलीकमेव दृश्यते। नैतत् मया प्रमाणत्वेन ग्रहणीयम्। [नर्टनमुद्दिश्य] अथान्यत् किमपि प्रमाणमास्ते भवतः?

नटनः। [सक्षोभम्] सर्वं प्रमाणमयथार्थं चेद् भूयः किं प्रमाणम् अहमुपस्थापयामि?

बीचक्रफट्। [चित्तरञ्जनमुद्दिश्य] दाशमहोदय! यदि ते वाक्यशेषोऽस्ति, स तावदिदानीमुच्यताम्।

चित्तरञ्जनः। माननीय विचारपते! न्यायाधीशो भवान्। भवतां न्यायनिष्ठता जगति शिक्षास्थानमेव। मम यद् यद् वक्तव्यं तत् पूर्वमेवोक्तम्। मया भूयोऽप्युद्घोष्यते—प्रतिवादी श्रीअरविन्दघोषमहोदयो निर्दोष एव। दोषलेशेनापि नायं स्पृष्ट इति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

आलोक्यतां पुरुषविग्रह एष देवो
निस्तन्द्रचन्द्रवदनिन्द्यमुखोऽरविन्दः ।
स्निग्धेऽस्य शान्तवदने सदने क्षमायाः
किं दृश्यते किमपि चिह्नमसज्जनीयम् ? ॥७२

बोच्क्फट् । अपि भवतोऽन्यत् किमपि वक्तव्यमस्ति ?

चित्तरञ्जनः । माननीय महाभाग !

आद्योपान्तं वाच्यमेकं ममैत-
दास्तां राजद्रोहवार्ता विदूरे ।
देशप्रेमोद्बुद्धभावं विशुद्धं
कोऽपि द्रोहः स्प्रष्टुमेनं न शक्तः ॥७३

प्रेमैव तस्य सर्वस्वम्—न विद्वेषः कस्मैचन् ।

अत्रत्याः सर्वे शृण्वन्तु मद्वचः । अस्या वितण्डाया अस्य कोलाहलस्यान्दोलनस्य वाऽपगमाच् श्रीअरविन्दस्य महातिरोधानात् पश्चादपि सुदीर्घकालपर्यन्तं जनाः सर्वे एनं देशप्रेमिकवरं जातीयतोद्बोधकरूपेण विश्वप्रेमिकरूपेण च संपूजयिष्यन्ति । तस्य महातिरोधानस्य बहोः कालादनन्तरमपि तस्य महिममयी—मधुरिममयी—अमृतमयी वाणी न केवलमस्मिन् देशे परन्तु सागरपरपारे दूर-सुदूरान्तरेऽपि ध्रुवं समुच्चारयिष्यते ।

बोच्क्फट् । [स्वगतम्]—

अहो आश्चर्यं माहात्म्यमेतस्य मे सहपाठिनः श्रीअरविन्दघोषस्य ।

नृपद्वारे घोरे विषमभयुक्तस्य सुचिरान्
न खल्वास्यं चिन्तामलिनमवलोकेऽस्य सुधियः ।
परं त्वैशी काऽपि द्युतिरतुलनीया नयनयो-
र्विराजन्ती विश्वं तृणवदतितुच्छं कलयते ॥॥७४

को वा हेतुरस्यैतादृशस्य चित्तस्थैर्यस्य ? न कस्मादप्येष बिभेति । प्रचण्डशक्तिधरं ब्रिटिश सिंहमेष तृणाय मन्यते । यथा मध्याह्नकालगामी प्रज्ञा-मार्तण्डः श्रीचित्तरञ्जनदाशमहोदयो भविष्यद्वाणीं करोति,

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

तथाऽवश्यमेव भविता। स्वयं भगवान् अस्य रक्षिता, कोऽस्यापकारं करिष्यति ?

[विचारसहायकान् (जुरि) उद्दिश्य]

श्रुतं भवद्भिरधरोत्तरम्। सर्वकारीयपक्षतोऽत्र भवान् मिष्टार नटैन-महाशयो यद्यद् उक्तवान् यच्च तस्य प्रतिवाद भाषणमभियुक्त-व्यवहाराजीवस्य श्रीचित्तरञ्जनदाशमहाशयस्य, तत् सर्वमपि श्रुतं भवद्भिः। अतः परमनयोर्वाग्विस्तरमुपजीव्य भवद्भिः स्थिरीकर्तव्यं यदयमरविन्दघोषोऽपराद्धो न वेति।

तद् भवन्तो मिथ आलपनार्थम् अभ्यन्तरं गच्छन्तु। मध्यन्दिनाव-सरादनन्तरं भवतां मम च सिद्धान्तः समुद्घोषयितव्यः।

तत्र चेदं भवद्भिरवश्यमनुधातव्यम्—

विचारमार्गैः सुतरां सुसूक्ष्मः पादौ निधेयाविह सावधानैः।
भ्रान्त्या भवेदेकत आत्मपातस्तथान्यतोऽन्यस्य शरीरपातः ।।७५।।
वरं तदास्तां नयवर्त्मनि च्छलं न प्राणनाशो मनुजस्य कस्यचित्।
इत्येवमाधाय मनःसु धारणां न्यायोऽवलोक्यो नयतत्त्ववेदिभिः ।।७६।।

(निष्क्रान्ताः सर्वे)

———

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

चतुर्थोऽङ्कः

तृतीय-दृश्यम्

(बागबाजारस्थ-निवेदिताभवनम्। श्रीअरविन्दस्याचार-प्रचारादि-विज्ञानार्थं नियुक्तस्य गुप्तचरद्वयस्य प्रवेशः।)

राधा एकबालः। भो भ्रातः श्यामसोहाग! सुष्ठुकर्मणि नियुक्ता वयम्। अस्माकं देशस्योपकाराय ये प्राणान् ददति, ते एवास्माभिः क्लेशजर्जरिताः कार्याः। श्रीअरविन्दस्य भगिन्या निवेदितायाश्च भारत-प्रेम सर्वथाऽतुलनीयम्, तथापि तयोरेव गतिविधि-पर्यवेक्षणायादिष्टा-वावाम्। अहो ललाटवैगुण्याद् भारतीया वयं भारतवर्षस्य भाटक-दातारो जाताः, द्वीपान्तरवासिनः श्वेतचर्म-परिवृताः कपिलाक्षाः पुनर्देशस्य भाग्यविधातारः।

श्यामसोहागः। भो भ्रातः राधा एकबाल! घोरः कलिकाल एषः। देशप्रेमाप्यनर्थस्य दौर्भाग्यस्य च कारणम्। कंसस्य निहन्तुः श्रीकृष्णस्याविर्भावः कदा नु भविष्यति?

राधा एकबालः। (सोपहासम्) कंसस्य निधनाय मथुरां गते श्रीकृष्णे राधायाः कष्टं प्रभूततरं संजनिष्यते। अहो नु कष्टं, अहो नु कष्टम्।

श्यामसोहागः। अयि राधाशक्ते! राधाहेतोस्ते समानुभूतिः। किन्तु देशजनन्याः किं भविष्यति? भ्रातः! परिहर परिहासम्। वस्तुतो न केवलं कंसस्य, सर्वनृपतिबन्धनकारणस्य जरासन्धस्यापि निधनं श्रीकृष्णेन करणीयम्। कंसो मथुरामण्डलं पीडयति; जरासन्धो निखिलभारतभूतलम्। कंसः षड्रिपूणामन्यतमः, जरासन्धो रिपुवृन्दसमुच्चयः। कंसोंऽशकलिः, जरासन्धो घोरः पूर्णकलिः। श्रीकृष्णेन द्वावेव निहन्तव्यौ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

राधा एकबालः। एतेन कस्तेऽभिप्रायः सूच्यते? अरविन्दः स्वयं श्रीकृष्णश्चेत् को वा कंसः, को वा जरासन्धः? अरविन्दस्य श्रीकृष्णरूपत्वे वा किं प्रमाणम्?

श्यामसोहागः। अपि न श्रुतम् आलिपुर-कारागारे श्रीकृष्णः स्वयमाविर्भूयारविन्दमेव धर्मग्लानिविदवनार्थं स्वप्रतिनिधित्वे वृतवान्? अहो, सा वेणुमनोहर-त्रिभङ्गतरङ्गित-भृगुपादलाञ्छित-मूर्तिः! यां दृष्ट्वा श्रीअरविन्दः स्वयमेव श्रीकृष्णत्वं प्राप। श्रीकृष्णो न चेत्, कथम् उत्तरपाडा-भाषणे परःसहस्रान् जनानसावुन्मादयामास? कथं क्षुद्रे कारागारकक्षे स्थित्वा न केवलं निखिलं भारतं, परन्तु सर्वमेव जगद् विस्मापयामास। वसुधा चकम्पे, पर्वतश्चचाल।

राधा एकबालः। किन्तु को वा कंसः? को वा जरासन्धः? का वा मथुरा, का वा द्वारकापुरी?

श्यामसोहागः। भो मूढमते! एतदपि न जानीषे? कंसो ब्रिटिशराजः कलिकाता-वृन्दावनतः कियद्दूरगतेन श्रीकृष्णेन हन्तव्यः; भूयो जरासन्धोऽखिल-विश्वस्यालसता-कलुषता तमोरूपः। ब्रिटिशभारतात् प्रापितेन समुद्रतीरवर्ति स्थानमध्युषितेन तेन सोऽपि कालेऽवश्यमेव हन्तव्यः। किन्तु अहो दौर्भाग्यम्! आवां कंसपक्षीयौ।

राधा एकबालः। एतेन किम्? न खल्वावां मनसा भारतद्वेषिणौ केवलं कर्मभोगक्रमेण शत्रुपक्षीयौ जातौ। पश्य—

मनसा भारतीयो यो यो वा भवति कर्मणा।
तयोराद्यः प्रशस्यो मे मनःशुद्धिर्गरीयसी॥ ७७

भ्रातः, चिराय दण्डायमानस्य मे पादव्यथा सञ्जाता।

(परितो विलोक्य) अहो, सौभाग्याद् दूरे याति मार्गगायकः कश्चन। तमेवाह्वयामि! (गायकमुद्दिश्य) भो भो भ्रातः! अत्रागच्छ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(ततः प्रविशति भक्तगायकः)

राधा एकबालः। भ्रात ! कृपया चित्तविनोदकं सङ्गीतमेकं कुरु।

भक्तगायकः। (गायति)

जननी मे भारत भूमिः।
प्रतिधूलिकणं पुण्यप्रवहना
शान्तिसुख-सुधां सतत ददानः
युग युगान्त-प्रेमजीवना
हृदि यस्या अन्तर्यामी।
पुनातु मां भारत भूमिः ॥७८

श्यामसोहागः। अहो चित्तोन्मादिनीयं गीतिः। गृहाण भ्रातः पारितोषिकम्।

भक्तगायकः। नहि नहि। नाहं मातृसङ्गीतं विक्रीणे। मातृ-पूजावर्जिते देशे मातृनामोच्चारणपूर्वकं सङ्गीतं कर्तुं शक्नोमि इत्येष एव मम महान् पुरस्कारश्च सौभाग्यञ्च। नान्यं पुरस्कारं वाञ्छामि। (इति निष्क्रान्तः)।

राधा एकबालः। (सोद्वेगम्) भ्रातः ! पश्य पश्य, अदूरे अस्माकं श्रीकृष्ण आयाति; तत्पृष्ठतश्च छद्मवेशेन वर्तते कंस-सेनापतिः कलिकाता-देशरक्षाविभागकर्तृ महोदयः। तदावाभ्यां सावधानाभ्यां भवितव्यम्। साम्प्रतम् आवां परमकर्मानुशीलनतत्परौ जातौ। हठात् कर्मणा वाचा च (नीचैः—न तु मनसा,) आवां कंसपक्षीयौ।

श्यामसोहागः। अहो ! पद्मपलाशलोचन श्रीकृष्णायित श्रीअरविन्द ! तुभ्यं सभक्तिप्रणमास्तेऽधमदेशवासिनो गुप्तचरस्य श्यामसोहागस्य। उत्तरपाड़ा-भाषणे यत्ते मानसरूपमभिव्यक्तं, तदेव जगद्वन्द्यम्। तेनैवाचिरेण कालेन सुचिरेण वा निश्चितमेव मगधाधिपतिर्जरासन्धो वधमापत्स्यते।

राधा एकबालः। एहि ! आवां दूरं गच्छावः। (निष्क्रान्तौ।)

[विष्कम्भकः]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(ततः श्रीअरविन्दः शनैशनैर्निवेदिता-निकेतनं प्रविशति,
भगिनी निवेदिता च त्वरितम् अन्यत आगच्छति)

श्रीअरविन्दः। भगिनि निवेदिते! नमस्ते! किमित्यद्यत्वे भवत्यन्यमनस्केव दृश्यते?

निवेदिता। अत्रभवान् उपविशतु, कृपयोपविशतु। भवदर्थमेव दारुणचिन्तापरायणाऽस्मि।

श्रीअरविन्दः। तत् कथम्?

निवेदिता। श्रुतं किल मया यत् साम्प्रतं शासनकर्तृपक्षीया भवन्तं देशान्तरं द्वीपान्तरं वा प्रेषयितुं यतन्ते। अहो तेषाम् अशान्तिर्भवतः कारामोचनहेतोः!

श्रीअरविन्दः। भगिनि! कथं चिन्तयसि? पश्यतु भवती—देशस्य समुद्धार-कर्म प्रारब्धमेव। तत् प्रचरिष्यत्येव।

कारारुद्धोऽरविन्दो भवतु भवतु वा प्रषितो देशमन्यं
द्वीपं द्वीपान्तरं वा, न खलु मम ततो लेशतोऽप्यस्ति चिन्ता।
मातुर्मन्त्रविनीतान् परिहृतमरणत्रासलेशान् यविष्ठान्
अद्य तान् भारतीयानविचलितमतीन् स्वापयत् कः प्रबुद्धान्॥७९

निवेदिता। तथापि, नेतार एव देशं चालयन्ति। तेषामभावेनान्दोलनं याति विरामम् उत्साहाग्निश्च लभते निर्वाणम् इति प्रायशो दृष्टचरम्। मन्ये भवतोऽसान्निध्यं देशपक्षे निदारुणं भविष्यतीति।

श्रीअरविन्दः। श्रूयताम्। एकदा कारागाराभ्यन्तरे ईदृशी चिन्ता ममापि अजायत। अद्य मया सानन्दं स्मर्यते यत् तदानीं श्रीलविवेकानन्दो विगतदेहोऽप्यविरतं पञ्चदश दिवसान् ममान्तिके स्थित्वात्मोत्कर्षविषयं ममोपदिष्टवान्। ममायं दृढविश्वासो जातो यद् भारतवर्षस्य स्वाधीनताऽनिवार्यैव। प्रत्यक्षतः सा पुनरन्यहस्तसञ्चालनेन भविष्यति, परं तत्र तत्र व्यापारे ममापि निमित्तता नितरां स्थास्यति।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

किञ्च, आवश्यककर्तव्यानुरोधेन निखिलविश्वस्य महोपकारसाधकं पन्थानमाविष्कर्तुं मया प्रयत्नः करणीयः। तेन भारतवर्षस्य पराधीनता-मुक्तिरवश्यं भविष्यति, तथा निखिलमानवसमाजस्यापि।

निवेदिता। (व्याकुला भूत्वा) तथापि तथापि।—

गतिरतिदूरेऽपरिचितदेशे न भवति यत्तो तनु तदुपायम्।
पिहितशरीरः कतिपयमासान् क्वचन निवासं कुरु करुणार्द्रः॥८०

श्रीअरविन्दः। भवती तादृशी चिन्ताजर्जरितास्ति चेत्, तमभिप्रायम् उपायान्तरेण संसिद्धं करिष्यामि। "वन्दे मातरम्" पत्रिकायां प्रकाशयिष्यामि नाम-स्वाक्षरयुक्तं किञ्चिन् निवेदनम् यस्य हेतोः शासन-कर्तृपक्षो मां बहिर्निष्काशयितुं न शक्ष्यति।

निवेदिता। तदवश्यं क्रियताम्। भविष्यत्-कार्य-पद्धतिः पश्चादेव स्थिरीभविष्यति। त्रिटिश-शासित-प्रदेशात् फरासी-शासित-राज्य-गमनं वरं वरणीयम्।

श्रीअरविन्दः। एषु विषयेषु भगवान् स्वयमेव स्वीयं मङ्गलकरं संप्रसारयिष्यति।

निवेदिता। यन् मे गुरुदेवः स्वयं ध्यान-गोचरो भूत्वा भवन्तं प्रबोधितवान्, तदेव सर्वेषां हिताय भविष्यति। सर्वथा देशसमुद्धरण-विषयेऽहं भवतो निर्देशानुसारिणी वर्ते।

श्रीअरविन्दः। सर्वो निर्देशो भगवत एव। अस्मौ यन्त्री, वयं यन्त्राणि। कर्तुरिच्छया कर्म। आत्मसमर्पणमेव परा गतिः।

निवेदिता। भक्तिरसविशोधित-नियतानुष्ठित-निष्काम-कर्म-माध्यमेन श्रीश्रीभगवच्चरण आत्मसमर्पणमेव श्रीमद्-भगवद्-गीतोपदिष्टः पन्थाः। भवतो जीवने स एवाविच्छिन्नम् अनासक्तमनुस्रियते चेत्, अन्येषामपि जीवनादर्शतामसौ गमिष्यति। ततो मे महान् आनन्दः।

श्रीअरविन्दः। नमस्कारो मे भगिन्यै।

निवेदिता। प्रतिनमस्कारो मे भ्रात्रे भारतहृदयारविन्दाय।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

(अरविन्दो बहिर्गन्तुं प्रवृत्तः)

(ततः प्रविशति व्यग्रा श्रीमती सरला घोषालजा)

सरला। विरमतु भवान् बहिर्गमनात्। भवतो गमनागमन-विलोकन-परायणौ गुप्तवेशधारिणौ गुप्तचरौ गृहाद् बहिर्वर्तेते। तयोः प्रत्येकं सन्देहदोलायमान-नेत्र-युगलम् अन्तर्गतं मनः प्रकाशयति। शासनकर्तृपक्षस्य अनाचारोऽस्माकं देशं नाशयिष्यति।

निवेदिता। (अरविन्दमुद्दिश्य) अपि श्रुतम् अनया किम् उच्यते ?

श्रीअरविन्दः। स्नेहममतासर्वस्वस्य नारीकुलस्य चित्तविनोदनं दुःखकरं सत्यम्। किन्तु देश-समुद्धार-तत्पराणां नारीणां पदे पदे दुःखवरणम् अनिवार्यम्। तथापि नाहं शासन-कर्तृपक्ष-कूटचक्रं भीति-कारणं मन्ये—जागरिता भवेयुश्चेन् मम देशवासिनः, विशेषतो देशमातरः।

सरला। भारतजनन्याः श्रेष्ठसन्तान! आकर्णयास्माकं प्रार्थनाम्—यथा भारतीय-स्वाधीनताकामिनां कर्म न मन्दायते तथा करणीयं भवता। तव कारावरोधो भविष्यत्यस्माकं महतेऽनिष्टाय।

श्रीअरविन्दः। भो भारतीय-मातरः! सर्वथातुलनीया भवत्यः। भवतीनां प्राणपणप्रयत्नैः सर्वा बाधा दूरं गमिष्यति। पुनरुदेष्यति भारतगौरवरविर्निखिल-जगतो दीपनाय।

सरला निवेदिता च। नमस्ते भारतारविन्दाय, नमस्ते।

— ——

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पञ्चमोऽङ्कः

प्रथम-दृश्यम्

(ततः प्रविशति श्रीमीरामाता प्रगाढभावोद्वेलिता)

श्रीमीरामाता। अहो! आ बाल्यात् जगल्लोनस्याथ च जगदतीतस्य कस्यचन मूर्तिर्नितरां मे हृदयमधिकरोति। पुनस्तस्य प्रियतमो योगेश्वरः कश्चन मया दृष्टः स्वप्ने। तस्यानुसन्धानाय परिभ्रमामि समग्रं प्राच्यदेशम्। कुत्र वा फरासीदेश., कुत्र वा भारतवर्षम्!

भगवन्, स्वप्नदृष्टं योगेश्वरं नराकारं मां प्रदर्शय! भ्रमणक्लिष्टा चिन्तादीर्णेयं ते दुहिता—कुरु कृपां देव!

(ततः प्रविशति श्रीअरविन्दः)

श्रीअरविन्दः। (स्वगतम्) केयं महिममयी मातृमूर्तिः? स्फुरल्लावण्या तपोविभवा योगविभूतिसमृद्धा स्ववक्षसि विश्वं धारयतीव।

(श्रीमीरामातरमुद्दिश्य)

भवति! को नाम देशो भवत्या जन्मना धन्यः कृतः? कथं वा भृशमाकुलिताऽसि? कथं वा रोदन-तत्परेव लक्ष्यसे?

श्रीमीरा। (स्वगतम्) अहो दैवनिबन्धनम्। बहोः कालादनन्तरं सिद्धो मे मनोरथः। अयं स स्वप्नदृष्टो मे सिद्धमहापुरुषः पुरुषोत्तमः।

श्रीअरविन्दः। आर्ये! कथं मां निपुणं विलोकयसि? किमहं भवत्या दृष्टपूर्वः?

मीरा। किमुच्यते दृष्टपूर्व इति? न केवलमेकदा।

दृष्टस्त्वं स्थितया मया चलितया भुञ्जानया सुप्तया
जाग्रत्याप्युपविष्टया किमधिकं सर्वास्ववस्थास्वपि।
एवं दृष्टचरं चिराय हृदये गाढं मनश्चक्षुषा
न प्रत्येमि कथं भवन्तमधुना साक्षादहो कुर्वती॥८१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीअरविन्दः। अपि भवत्याः किमपि कर्तु पारयामि ?

श्रीमीरा। देव! भवानेव सर्वं कर्तुं पारयति। भवदर्थमहं फरासी-देशान्निर्गत्य समग्रं प्राचीमण्डलं परिभ्रमामि। स्वप्ने दर्शनं प्रदाय कथं वा दूरं गत आसीः ?

हित्वा जन्मभुवं विहाय जननीमुत्सृज्य बन्धूंस्तथा
त्वामन्वेष्टुमुपागतं ननु मया दूरान्तरं भारतम्।
देशाद्देशमहो पुरात् पुरमिमां मा भ्रामयन् भूयसा
स्वप्ने सन्निधिमागतः किमु भवान् दूरे दृशोर्वर्तते ॥८२

श्रीअरविन्दः! अहो! भ्रमणकातरा भवती प्रथमतः आत्मानं विनोदयतु। आर्ये—(इत्यर्धोक्ते)

श्रीमीरा। नहि नहि, नाहं क्लान्ता।

वाञ्छितधनस्य लाभात् क्लान्तिर्ममापगता चिरान्मनसः।
अधुना कथयतु देवः कथमासीर्दूरे नयनयोः ॥८३

श्रीअरविन्दः। अत्र परमात्मा ब्रह्मैव प्रमाणम्। अपि रोचते भवत्यै स्थानमिदम् ?

श्रीमीरा।

रम्यं नन्दनकाननात् त्रिदिवतः पूतं क्षितौ भारतं
प्राविक्षन्नहि यत्र मत्तधरणेरुन्मत्तकोलाहलः।
वह्निर्ज्ञानमयः करोति भसितं लोभादिकान् षड्रिपून्
मन्त्रेणैव च केनचिद् व्यवहिता सा लालसा मानसी ॥८४

अदूरे सुगम्भीरं नदति समुद्रकल्लोलः, किन्तु स्तब्धोऽत्र वासना-लोल-कल्लोलः। नीलं नभो व्याकुलं व्यालोकयत्यदूरे सुनीलं पयोऽत्र तु स्निग्धनयनाञ्जनलेखा प्रसरति धारानिबद्धा दिग्दिगन्तं प्रति, आलिङ्गति च विश्वजीवन-दिव्यजीवन-तारुण्यहरिल्लेखाम्। बाह्यात् सौन्दर्यादन्तरं सौन्दर्यमेव समधिकतरम्।

श्रीअरविन्दः। भारतीय-तत्त्वानुगतमान्तरं सौन्दर्यं किमु भवत्यै रोचते ? मम योगसाधना सर्वथा भारतीयप्राचीनशास्त्रानुसारिणी।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीमीरा। देव! यदि नान्यथा मन्यसे, कञ्चित् विशेषप्रश्नं कर्तुमस्ति मे महत् कौतूहलम्।

श्रीअरविन्दः। पृच्छतु भवती। रोषनामधेयः पदार्थो मयि न विद्यते। यदि नातीव गुह्यं स्याद् वचः, तदवश्यमेव त्वत्साहायकं मया विधास्यते।

श्रीमीरा। कथं भवान् स्वप्ने मम प्रत्यक्षो भूतः?

श्रीअरविन्दः। तत्र तु भगवदिच्छैव बलीयसी। नाहं तत्र कर्मकर्ता।

श्रीमीरा। अपि भवतो योगसाधना स्वतः सिद्धा, गुरुपरम्परा-मार्गानुसारिणी वा?

श्रीअरविन्दः। आर्ये! तरुणे वयसि वरोदावस्थानकाले महाराष्ट्रीय-भास्कर-वर्मलोले इत्यतः किञ्चिद् योगकौशलमासीन्मया परिज्ञातम्, तदनु नर्मदातीरवर्ति स्थानमधितिष्ठतः स्वामि-ब्रह्मानन्दतः। तेन योगाभ्यासकौशलं किञ्चित् परिज्ञातम्। न तु सरसं तत्त्वं किमपि। तस्मादधुना मया दिव्यजीवनस्य सरलसुभग पथाविष्करणायोत्तरोत्तरं समधिकः प्रयत्नः क्रियते।

श्रीमीरा। भवतां दुष्कर-तपस्या-लब्धं ज्ञानं यथा जगद्वासिनां भवेद् विदितं, तदर्थं कश्चन उपायः किमिति न मृग्यते?

श्रीअरविन्दः। (समौनं तिष्ठति।)

श्रीमीरा। अप्यत्र किमपि गुह्यम् आस्ते?

श्रीअरविन्दः। न हि। किन्तु कः स उपायो यो भवत्या परिचिन्त्यते?

श्रीमीरा। काचन ज्ञानधीविकरणकारिणी पत्रिका।

श्रीअरविन्दः। प्रबन्धस्य विरचनादिषु न तथा काठिन्यं यथा प्रकाशनादिषु।

श्रीमीरा—

दया भागवतो सर्वान् प्रत्यूहान् नाशयिष्यति।
प्रारभ्यतां पत्रिकेयं बलमाधाय मानसे॥८५

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अथ कः खलु भवतां शुभाविर्भावदिवसः ?

श्रीअरविन्दः। नातिदूरवर्ती मम जन्मदिवसः। आगामी आगष्टमासस्य पञ्चदश-दिवसः सः।

श्रीमीरा। शुभस्य शीघ्रम्। न विलम्बः करणीयः।

श्रीअरविन्दः। आर्ये! यद्यावयोरनुपस्थितिकाले विपन्ना स्यान्नु व्यवस्था ?

श्रीमीरा। देव!

न भवेत् क्वचिदपि बाधा विश्वस्य दिव्यजीवनमिच्छोस्ते।
शुभकर्मसमारम्भो निष्कण्टकपथमनुसरति प्रायः ॥८६

श्रीअरविन्दः। (चिन्ताकुलः)

श्रीमीरा। देव, ब्रवीतु, ब्रवीतु, प्रस्तावोऽयं मे भवता स्वीकृत इति।

श्रीअरविन्दः। (सस्मितम्) यद् भवत्यै रोचते।

श्रीमीरा। कथाप्रसङ्गेन जायते मम चित्ते काचनान्या जिज्ञासा।

श्रीअरविन्दः। अपि श्रान्तिर्नानुभूयते भवत्या ? विश्रामग्रहणानन्तरं सायं मे सान्ध्यभाषणावसरे पुनः संलापो भविष्यति।

श्रीमीरा। नहि नहि देव! महती मे ज्ञानपिपासा, सा पुनरधुनैव निवारणीया।

श्रीअरविन्दः। कतमं विषयमधिकृत्य प्रचरति ते मनसि प्रश्नप्रवृत्तिः।

श्रीमीरा। भवज्जीवन-घटना-परम्पराम्।

श्रीअरविन्दः। यथाभिलाषं पृच्छ्यताम्।

श्रीमीरा। भवतां विश्रामसमयश्चेद् विरमामि।

श्रीअरविन्दः। नाहं श्रान्तोऽस्मि। न च विश्रामस्य मे निर्दिष्टः समयः।

श्रीमीरा। अपि भगवान् कदापि भवता साक्षाद्दृष्टः ? दृष्टश्चेत् किमाकारोऽसौ ?

श्रीअरविन्दः। भक्तजनचित्तानुकारि भगवद्रूपम्। तत्तु मया दृष्टम्—इतः कतिपयवर्षेभ्यः प्राग् आलिपुर-सेन्ट्राल-जेलाभ्यन्तरे। "जेल"

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति साधारण्ये "कारागार" नाम्ना प्रचरति ; किन्तु आंग्ल-भाषायां तं "होटेल" नाम्ना अभिदधामि, "शुल्कहीनहोटेलः"। कारागारे सर्वेषां भवति कष्टं, किन्तु न मे कदाचिदासीत् कष्टम्।

द्वापरे कुरुरणे विजयं यः स्वीयरूपमुपदर्शयति स्म।
आविरास्त नृपबन्धनगेहे नेत्रयोर्मम विभुः स हि कृष्णः ॥८७
शास्ति मां स करणीयमशेषं सर्वदा वितनुते हृदि हर्षम्।
मोचकश्च समवोचदसौ मे चित्तरञ्जनमहोदयमादौ ॥८८

तस्मान् मम कारागार-मोचन व्यापारो मम ज्ञातचर एव आसीत्। संवत्सरव्यापिनि मम कारागारावस्थानकाले ईदृशं ममासीत् सुखं यद् विचारालयं नीतोऽपि नाहं विचार पद्धति-प्रकारादि विषये मनः क्षणमपि न्यधाम्। केवलम् इदमेव दुःखं यत् ब्रिटिश-सर्वकारस्य दुर्विवेचनाफलेनाहं जातीयनेतृरूपेण परिज्ञातोऽस्मि।

श्रीमीरा। कथं सर्वकारीयदुर्विवेचना ? अपि नेच्छति भवान् सत्यपि महति प्रयोजने पुनः प्रत्यावर्तनं राजनीतिक्षेत्रे ?

श्रीअरविन्दः। न कदापि।

दृशा किल विलोकितं मया सुचिराद् ध्यानगभीरया शुभे।
न हि शाश्वत-दिव्यजीवनादपरं ननु करणीयमस्ति मे ॥८९

राजनीतिक्षेत्रे पुनरासते महान्तो जनाः श्रीतिलक-चित्तरञ्जन-लालालाजपत-डाःमुञ्जे-मुख्याः। पुनराविर्भविष्यन्ति चान्ये महान्तो देशनेतारः। भारत-स्वाधीनता-लाभ-व्यापारे यथाहं साहायकं विधास्यामि, तथा विश्ववासिनां सर्वेषाम् उत्तरोत्तर-दिव्यजीवनलाभेऽपि। पश्य पश्य देवि !

मम भारतवर्षमेव भूयात् समुन्नततरं सर्वतः पृथिव्याम्।
इयमेककपक्षपातदुष्टा न तु दृष्टिर्भवति क्वचिन्ममार्ये ॥९०
न त्रिनोन्नतिमस्य भारतस्य परदेशोन्नतिरस्ति वस्तुगत्या।
अत एव यतेऽहमेकनिष्ठो व्यपनेतुं चिरपारतन्त्र्यमेतत् ॥९१

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

भारतीया प्रज्ञैव चिरादनुस्मियते विश्ववासिभिः। अद्य पुनस्तस्या एव प्रज्ञायाः पुनर्वितरणकालः समायातः।

श्रीमीरा। देव! अप्येषु कर्मसु किमपि मे करणीयम् अस्ति?

श्रीअरविन्दः। देवि! भवती महाशक्तिः। आद्याशक्तिरूपिण्या भवत्या सह मम परिचितिर्नाद्यतनी, परं सनातन्येव। भवत्याः कार्यं भवती स्वत एव करिष्यति, कस्तत्र दास्यति बाधाम्? जातायामपि बाधायां का भविष्यति क्षतिः? क्षतिश्चेत् साऽपि स्याद् विश्ववासिनाम्, न भवत्या मम वा। अथवा, सर्वमेव तस्य इच्छानुसारि।

श्रीमीरा। साम्प्रतं गर्जति विश्वरङ्गमञ्चे विश्वविध्वंसिनी रणवनघटा। न केनाप्युपायेन तस्या रोधः कर्तुं शक्यते। योगपथेन, ध्यानमार्गावलम्बनेन वा।

श्रीअरविन्दः—

क्वचित् क्वचित् सृजति विनाशमात्मनः
स्वयं जगत् प्रतिविधिरत्र को भवेत्।
न पक्तिमं सुपरिहरं क्रियाफलं
न यत्नतस्तदपि विराम ईप्सितः ॥९२

परस्पर-हिंसा द्वेष-विद्वेषादिक-विनाशार्थं परिकल्प्यते मया विश्व-दिव्य-जीवनानयनम्। तस्य प्रारम्भः साम्प्रतं कृतः। जगतः प्रारब्धं क्रियाफलं न भवतु निवारणीयम्, किन्तु भविष्यति यथा महदनिष्टं न प्रजायेत तदस्माभिर्विधास्यते। यदाऽऽसुरशक्तेरुद्भवो भविष्यति द्वितीय-महायुद्धकाले जार्मानोदेशतस्तदानीमस्माकं क्षमता-प्रयोगो भविष्यत्या-वश्यकः।

श्रीमीरा। देव! भवत्कृपां स्मारं स्मारमहम् आत्मानं कृतकृतार्थं मन्ये। भगवदिच्छा विजयताम्।

(निष्क्रान्तौ)

———

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पञ्चमोऽङ्कः

द्वितीय-दृश्यम्

(पण्डिचेरीस्थ श्रीअरविन्दवासगृहे श्रीचित्तरञ्जन-दाश-महोदयेन सह श्रीअरविन्दस्य संलापः)।

श्रीअरविन्दः। स्वागतम्! चित्त! अशेषस्नेहास्पद! स्वागतम्! बहोः कालादनन्तरं जातमस्माकं संमेलनम्। किन्तु चित्तमधुरिम-शोभां नित्यमहं पश्यामि।

चित्तरञ्जनः। अहो! मनोरमो भवत आश्रम-परिवेशः। अन्तहीन-स्तोयनिधिः कोटि तरङ्ग-भङ्ग-रङ्गैस्त्वां विश्वजीवनोन्नयनाय प्रणो-दयतीव! मर्मभेदि मनोवेदनम् अपारोऽगाधः समुद्रो भवत्सकाशे निवेदयति। यतो भवानेव सर्वाधिकरूपेणाद्यत्वे जगति राजते।

श्रीअरविन्दः। (विहस्य) किन्तु अपूर्व-गीतिमाला-रूपः "सागर-सङ्गीत" नामको ग्रन्थस्तत्रैव कृतिः। तत्राहं केवलं स्वरमात्रम्।

चित्तरञ्जनः। किन्तु स्वरो नादादभिन्न एव। तस्मात् कथ्यते "नादब्रह्म" इति।

(उभौ हसतः)

श्रीअरविन्दः। चित्त! चन्दननगरे मतिलालस्य प्रवर्तक-सङ्घस्य वा का वार्ता?

चित्तरञ्जनः। सर्वं कुशलम्। वाणिज्यद्वाराऽर्थार्जनेन साकम् आध्यात्मिकसाधनस्य समञ्जसत्वम् अत्यधिकभागवतकरुणासापेक्षम्।

किन्तु "स्वराज्य दलस्या"धिनायकत्वं स्वीकृत्य भवता पुनरपि राजनीति-क्षेत्रे समागन्तव्यं—देशस्यास्माकं महते हिताय। भवतः स्वीकृतिलाभार्थं सुदूर वङ्गदेशादहं पण्डिचेरीम् आगतोऽस्मि।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

श्रीअरविन्दः। प्रिय चित्तरञ्जन!

पथा योगमाजा नवीनानुभूते-
र्विधानं हि लक्ष्यं नृणां जीवनस्य।
इदं मे मतं यत् पुराऽव्यक्तमासीत्
समुद्भासमानं तदेवाद्य जातम् ॥९३

शरीरं मनो जीवनं बुद्धि-देहौ
किमेतानि कुर्युः समुद्योगमस्मिन्?
समस्यामिदानीं समाधातुमेना-
मभूवं समर्थश्चिरं चिन्तयित्वा ॥९४

ततश्च—भो भ्रातश्चित्तरञ्जन!

यदिदं मम दर्शनमाविरभूद्
बहुयोगयुजो भगवत्कृपया।
तदिदं सफलं जहदर्धपथे
न मनो विषयान्तरमिच्छति मे ॥९५

मया चिराय गुप्तभावेन स्थातव्यम्। आध्यात्मिकजीवनोन्नतेः परां काष्ठां संलभ्य ततः पश्चान्मया मार्गान्तरम् अवलम्बनीयं भवेदपि।

चित्तरञ्जनः। किन्तु निखिलं भारतवर्षं भवन्मुखापेक्षि समास्ते। तिलकमहोदयस्य देहपातादनन्तरं भवान् एक एव तथाविधो जनो यो देशस्य नेतृत्वभारवहनाय सत्यं समर्थः।

श्रीअरविन्दः। मा मैवं भण चित्तरञ्जन! सत्यमहं ब्रवीमि—स्वाराज्य-व्रतपालनद्वारा भारतवर्षस्य स्वाधीनतासंघटनविषये तिलकमहोदयादनन्तरं त्वमेव योग्यतमो जनः। किञ्च,

आध्यात्मिकोन्नतिरशेषशुभप्रसूति-
र्देशस्य नूनमिति मे सुदृढा प्रतीतिः।
सा देशनेतुरपि याति यथाऽतिभूमिं
तत्र त्वयापि सुतरां यतनीयमेव ॥९६

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

अस्मिन् तवाध्यात्मिकोन्नतिविषये मया प्रयत्नः सर्वथा सर्वान्तःकरणेन करिष्यते। तव स्वाराज्य-दलस्य सार्थकतावाप्तयेऽपि मया साहाय्य-मकुण्ठं प्रदास्यते। प्राणप्रिय चित्त ! मा दुःखितो भूः। तव सर्वाङ्गीण-मङ्गलम् अवश्यमेव भविष्यति।

चित्तरञ्जनः। पूज्यपाद भारतगुरो ! भवतः स्नेहाशीर्धारा नित्यं मां पवित्रं करोतु।

श्रीअरविन्दः। भारतचित्तरञ्जक चित्तरञ्जन ! गमनात् प्राङ् मातृनामोच्चारणं कुरु।

चित्तरञ्जनः। यद् भवान् आदिशति।

(स्तोत्रपाठः)

मातः सुतहितचिन्तनशीर्णे
लालन-पालन-पोषणजीर्णे।
तव चरणे मम नतिरतिभक्त्या
कामं विलसतु किमिह बहूक्त्या ॥९७
अलमिह सकलामचलां भ्रान्त्वा
फलमिह किं वा तीर्थं क्रान्त्वा !
चरणे तव यदि निरुपधि-भक्तिः
सैव भवेन्मे भगवति मुक्तिः ॥९८
अम्ब शरीरं धत्से द्वेधा
स्वीकृत-चिन्मय-मृन्मयभेदा।
आशैशवमवसानं यावद्
बिभर्षि तनयान् हृदये तावत् ॥९९

(उभौ निष्क्रान्तौ)

———

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

पञ्चमोऽङ्कः

तृतीय-दृश्यम्

स्वाधीनता-दिवसः।

(पण्डिचेरीस्थ-श्रीअरविन्दाश्रमे श्रीअरविन्दः श्रीमीरामाता च)

